शा. रुद्री
१

॥श्री गणेशाय नमः॥ श्रीसिद्धेश्वर्यै नमः॥ नंदसूनुपदद्वंद्वं निधाय हृदि चिंतया॥ तनोति कुतुकं किंचिद्रुद्रदे
वः समासतः॥१॥ कामहस्तधृतनमस्त्रपुरधनुः कोप्यमसुदीत्यकुप्यतः॥ धूर्जटेर्नयनकोणशोणता हंतु
सर्वज्ञगतामुपद्रवं॥२॥ पदार्थतत्वयाद्दृशिरोमणिर्निर्णीतवानुजीर्णामतस्य हृषरोगः। तद्देवतनकेनराविचार्या
मर्मस्यर्थं केनेन रखंडनेन॥३॥ अवसरसंगत्या परार्थतत्वेनिर्वक्तुं शिष्यावधानाय प्रतिजानीते। अपेत्यादि
नञ्पदादेः संसर्गाभाववत्वान्योन्याभाववत्वादीशकालतावच्छेदकत्वव्यवस्थापनानंतरं प्राचीनाभ्युपेतपरा
र्थानां कस्यचिद्दृत्ति रिक्तत्वं कस्यचिन्नवृत्तं नकस्यचिद्दृत्तिरिक्तत्वं तनकेनाव्यवस्थाप्यतइत्यर्थः। तत्रेति।
प्राचीनाभ्युपेतपदार्थेषु मध्येइत्यर्थः। दिक्कालावित्यादि। दिक्कालयोरीश्वरादतिरिक्तत्वं यत्प्राचीनैः। स्वीकृ
तं तन्न मुक्तिसिद्धं तयोस्तदतिरिक्तत्वप्रमाणाभावादित्यर्थः। नचात्र दिक्त्वपक्षतावच्छेदकीकृत्य अतिरि
क्तत्वं यत्प्राचीनैः। स्वीकृतं तन्न मुक्तिसिद्धं। तयोस्तदतिरिक्तत्वाभावसाधने सिद्ध्यसिद्धिव्याघात इति वाच्यम्।
एवं स्यादिदं घट इत्यादिप्रतीतिविषयीभूतविभुत्वस्यैव दिक्त्वरूपता। नचतथापि कालत्वं पक्षतावच्छेदकीकृत्यातिरि
रिक्तत्वाभावसाधने सर्वथा [illegible] इति वाच्यम्। इदानीं घट इत्यादिप्रतीतिविषयीभूतविभुत्वस्यैव कालत्वरूप

श्री रामः
१

त्वात्। विभुत्वं च मूर्त्तेतरद्रव्यत्वं। ननु परममहत्त्वरूपं ईश्वरात्मनिरूपकीभ्यमाणत्वेन विभुत्वाभावापत्तेः। ननु
दिक्कालयोरतिरिक्तत्वानभ्युपगमे पूर्वस्यां घटः इदानीं घटः इत्याद्यनुगतप्रतीत्यनुपपत्तिः। न चेश्वरादेव तथा
प्रतीतिनिर्वाह इति वाच्यम्। तथा सति प्राच्यां घटः प्रतीच्यां घटः इत्यादेः इदानीं घटस्तदानीं घटः इत्यादेश्च वैल
क्षण्यानुपपत्तेः। ईश्वरस्यैकत्वादित्यत आह। तत्तन्निमित्तेति। तत्तत्कालोपाधि तत्तद्दिगुपाध्यवच्छिन्नादित्य
र्थः। तत्तत्कार्यविशेषाणामिति। प्राच्यां घटः इत्यादिप्रतीतीनामित्यर्थः। परेषामित्यादि। कालदिशोरतिरि
क्तत्ववादिनामित्यर्थः। तथा च तेषामपि कालस्य दिशश्चैकत्वात्तथा तत्तदुपाध्यवच्छिन्नाभ्यां ताभ्यामेव प्रा
च्यां घटः इदानीं घटस्तदानीं घटः इत्यादेश्च वैलक्षण्यनिर्वाहः। तथा मन्मतेऽपि तत्तदुपाध्यवच्छिन्नादीश्वरादे
व तादृशप्रतीतीनां वैलक्षण्यनिर्वाह इति भावः। भावकार्यस्य समवायिकारणजन्यत्वनियमात् शब्दसम
वायितयातिरिक्ताकाशस्य सिद्धिः। ईश्वरस्य च शब्दसमवायिकारणत्वं जीवस्यैव समवायिकारणजन्यत्व
नियमात् शब्दसमवायितयातिरिक्ता। तथात्वमाशयाविनिगमनाविरहेण निरस्तम्। न च जीवानामानन्त्यमे
व विनिगमकमिति वाच्यम्। प्रत्येकं जीवमाशयविनिगमनाविरहसंभवात् इति सिद्धं। निमतं हृष्यति। प्राह

ति। तथा च जन्यमात्रे प्रतीश्वरस्य कारणतायाः क्लृप्तत्वात्तत्र समवायित्वमात्रं कल्पने चेश्वरस्य शब्दसम
वायित्वे विनिगमकं। जीवानां तथात्वे कारणत्वसमवायित्वयोर्द्वयोः कल्पने गौरवात्। ननु जीवानां हेतुत्वमु
भयसिद्धमेव। तथा हि। शब्दो जीवजन्यः जीवादृष्टजन्यत्वात् सुखवदित्यनुमानसंभवात्। इत्थं च जीवानां त
थात्वेपि समवायित्वमात्रं कल्प्यमित्यस्यैव विनिगमनाविरह इत्यत आह। शब्द इत्यादि। ननु कारणत्वं हि का
र्यतावच्छेदकभेदेन प्रत्यासत्तिभेदेन च नाना। तथा च कालिकप्रत्यासत्त्या जन्यत्वावच्छिन्नं प्रति हेतुत्वमीश्वरस्य क्लृ
प्तं। ननु तादात्म्यप्रत्यासत्त्या शब्दत्वावच्छिन्नं प्रति तथात्वं। इत्थं चेश्वरेपि शब्दत्वावच्छिन्नस्य तादात्म्यसंबंधावच्छि
न्नकारणत्वं समवायित्वं च द्वयं कल्प्यमस्यैवाविनिगमनाविरह इत्यत आह। अस्मदादेश्चेति। विजातीयमनः
संयोगाश्रयसमवायरूपकारणस्य शब्देपि सत्त्वात्तस्य ज्ञानादिवल्लौकिकमानसापत्तेरित्यर्थः। न च संस्कारा
दीनामिव शब्दस्यापि मनसो योग्यतया मानसापत्तिरिति वाच्यम्। सामग्रीसत्त्वे कार्यावश्यंभावात् संस्कारादीना

मनापत्त्या तादात्म्यप्रत्यासत्त्या प्रतिबंधकत्वाभ्युपगमात्। न तु शब्दस्य प्रतिबंधकत्वकल्पने तु कल्पनागौरवमे
व विनिगमकमिति॥ अथ संस्कारादीनां प्रतिबंधकत्वकल्पनापेक्षया लाघवादुक्तालौकिकमानसत्त्वावच्छि

त्वंप्रतिज्ञानादिप्रयोज्यगुणवृत्तिजातिविशेषावच्छेदेनहेतुत्वकल्पनायाएवौचित्यात्तादृशस्यवैजात्यविशेषाना
क्रांतत्वेनेनतन्मानसापत्तिः।नचायोग्यसंस्कारादिष्वेवजातिविशेषंकल्पयित्वातदवच्छेदेनतादात्म्यप्रत्यासत्त्या
प्रतिबंधकत्वमादायविनिगमनाविरहः।तन्मतेविजातीयगुणाभेदत्वेनहेतुतायाकारणतावच्छेदकगौरवेपिविजा
तीयगुणत्वेनहेतुतायामपिगुणमानसत्वस्यविजातीयगुणमानसत्वस्यैववाजन्यतावच्छेदकत्वस्वीकरणीय
त्वात्कार्यतावच्छेदकगौरवेणसाम्यंमानसत्वमात्रस्यजन्यतावच्छेदकत्वेआत्मत्वावच्छिन्नतादात्म्यप्रत्यासत्त्या
विजातीयगुणाभावात्तन्मानसेव्यभिचारापत्तेः।विजातीयसंस्कारादिगुणाभेदस्यसर्वत्रैमानसविषयेसत्वेन
व्यभिचाराभावान्मानसत्वमात्रस्यैवतादृशगुणाभेदजन्यतावच्छेदकत्वादितिवाच्यं।विनिगमनाविरहात्कारणत्व
स्यप्रतिबंधकत्वस्यचस्वीकारेपिशब्दस्यकारणतावच्छेदकवैजात्याभावेनप्रतिबंधकतावच्छेदकवैजात्य
सत्वेनैववाप्तमानसकारणाद्धितिविनिगमनाविरहेणानन्तजीवानामीश्वरस्यचशब्दसमवायिकारणत्वक
ल्पनामपेक्ष्यशब्दसमवायित्वेनातिरिक्ताकाशकल्पनमेवसमुचितमिति।भेदं।विजातीयगुणत्वेनहेतु
तायांतस्यकार्यतावच्छेदकंगुणमानसत्वंविजातीयगुणमानसत्वंवेतिविनिगमनाविरहापत्तेः।प्रतिबंध

दी॰प॰टी॰
३

केत्वकल्पनाया एवसमुचितत्वात्। नचगुणत्वजातेर्दीधितिकृतैवनिरसनीयत्वात्तायं विनिगमनाविरह इतिवाच्य
म्।तथापिघटाकाशसंयोगवाञ्चक्षुषवारणाय चाक्षुषविषयत्वाभावप्रतिबंधकत्वकल्पने चक्षुरिंद्रियसंयोगव्य
भिचारवारणाय द्रव्यान्यसत्वाक्षुषत्वस्य जन्यतावच्छेदकत्वे नापेक्षयाद्रव्यव्यावृत्तजातिविशेषकल्प्येपि
त्वाविजातीयसत्वाक्षुषत्वेस्यैवतज्जन्यतावच्छेदकतायाः क्लृप्तत्वात् तादृशविजातीयसन्मानसत्वस्याविजाती
यगुणमानसत्वस्यवाजन्यतावच्छेदकत्वमाहाय्यविनिगमनाविरहापत्तेः। नचगुणत्वजातेर्मानाभावेन सां
कर्यानवकाशात् तादृशजातेर्लोकादिसाधारणानाभावात् विजातीयमन्मानसत्वस्यावच्छेदकत्वासंभ
वान्नविनिगमनाविरह इतिवाच्यम्।एवमपितस्यकार्यतावच्छेदकं विजातीयगुणमानसत्वं विजातीयगुण
प्रत्यक्षत्वंवेतिविनिगमनाविरहतादवस्थ्यात्।नचज्ञानतोघटइत्यादिमानसोपनीतभानमादायघटादौव्यभि
चारवारणायविजातीयगुणलौकिकत्वस्यजन्यतावच्छेदकत्वेमानसत्वस्यैवानिवेशान्नविनिगमनाविरह श्रीरामः
इतिवाच्यम्।विजातीयगुणलौकिकत्वावच्छिन्नस्यविषयतासंबंधनात्मन्यपिउत्पत्तेर्विजातीयगुणवृत्तिलौ ३
किकविषयताया विजातीयगुणवृत्तिविषयतायावाकार्यतावच्छेदकप्रत्यासत्तित्वेकार्यतावच्छेदकमानस

त्वंप्रत्यक्षत्वंवेतिविगमनाविरहस्यदुर्वारत्वात्।नचप्रत्यक्षत्वादिजातेरीश्वरज्ञानसाधारण्येनित्यवृत्ति
तयातस्यकार्यतानवच्छेदकत्वेनेतरवच्छेदकत्वमादायनविनिगमनाविरहइतिवाच्यम्।विशेषणज्ञानजन्य
तावच्छेदकतयासिद्धस्येश्वरज्ञानव्यावृत्तजातिविशेषस्यावच्छेदकत्वमादायविनिगमनाविरहस्यतथाप्यनु
द्धारात्॥नचविजातीयगुणत्वेनप्रतिबंधकतायामपितस्यप्रतिबध्यतावच्छेदकंमानसत्वंप्रत्यक्षत्वंवेति
विनिगमनाविरहोस्त्वितिवाच्यम्।आत्ममनःसंयोगादीनामपिमानसानुदयात्प्रतिबंधकतावच्छेदकजाते
स्तत्राप्यवश्याभ्युपेयत्वात्।प्रत्यक्षत्वस्यजन्यतावच्छेदकत्वेसंयोगेविजातीयगुणभेदासत्त्वात्तत्राशुद्धारावे
वव्यभिचारात्।योग्यसंयोगासत्तादृशजात्यस्वीकारेसंयोगत्वादिनासांकर्यप्रसंगात्।वस्तुतस्तु।प्रतिबंधक
त्वंमानसत्वावच्छिन्नप्रत्येकधर्मावच्छिन्नंप्रतिकारणत्वंवाकल्प्यनइतिविनिगमनाविरहावकाशएवनास्ति।वि
जातीयगुणविषयकमानसत्वावच्छिन्नंप्रति।विजातीयगुणत्वेनहेतुतायांविजातीयगुणविषयकात्मत्वमा
नसस्यापिमनःसंयुक्तसमवायेनजननात्तादृशसामान्यसामान्यसामग्रीवत्तात्संस्कारादिमानसस्योत्प
त्तेर्वारणायप्रतिबंधकत्वकल्पनायाएवन्याय्यत्वात्।तत्रात्मत्वादीनांहेतुत्वकल्पनानन्तापत्तिरितिचेत्कल्प

नायाएवाधिकत्वात्। नच संस्कारादीनां विजातीयगुणत्वेन प्रतिबंधकत्वेपि तादृशवैजात्यमेव शब्दसाधार
णमस्तु। तथा च शब्दस्य न मानसोपपत्तिरिति वाच्यम्। शब्दे ततु संबंधकत्वेन तायोग्यताधिक्यात्। न चेश्व
रेच्छादिसमवायस्याकारेपि मनःसंयुक्तेश्वरसमवायस्य सत्वात् मानसापत्तिवारणाय शाब्दत्वप्रतिबंधकता
वच्छेदकजातिकल्पनमावश्यकमिति वाच्यम्। ईश्वरे विजातीयमनःसंयोगानभ्युपगमात्। परकीयज्ञा
नादिप्रत्यक्षवारणाय तत्पुरुषीयात्मसमवेतमूर्तानसंप्रति तत्पुरुषीयविजातीयमनःसंयोगाश्रयसमवा
यत्वादिनैव हेतुत्वाभ्युपगमादिति। परे तु भेर्यादीनामेव गुणाः शब्दः॥ तथापि भेर्यां शब्दः इति प्रतीतिव
चनात् तत्रावच्छेदकत्वात् स्वस्वरूपसंबंधस्यावश्यं स्वीकरणीयत्वात्। अवच्छेदकतासंबंधेन शब्दोत्पत्तौ भेरी
दंडसंयोगादीनां हेतुत्वस्य कल्पनानीयत्वाच्च। मन्मते समवायसंबंधेन शब्दप्रत्यक्षे तेषां हेतुत्वाभ्युपगमा
दिति नेश्वरेति गिरिगगने वा शब्दसमवायित्वं स्वीक्रियते गौरवात्। न च भेर्यादौ शब्दसमवायित्वस्वीकारे भेरीना
शं विनापि शब्दनाशाद्भेरीसमवेतनाशं प्रति भेरीनाशस्य हेतुताया व्यभिचार इति वाच्यम्। सत्यामपि भेर्यां
याकास्मिन् तदीयरूपादिनाशात् तद्व्यभिचारवारणाय भेरीनाशकालीनभेरीसमवेतनाशत्वस्यैव तज्जन्यताव

छेदकत्वाभ्युपगमेनव्यभिचारानवकाशात्। नचभेदांशात्मसमवायस्वीकारेभेरीचक्षुःसंयोगदशायांचक्षुः
संयुक्तसमवायस्यतत्त्वेसत्त्वाद्रूपादिवत्तस्यचाक्षुषापत्तिः। रसादीनामिवशब्दस्यसमवायस्वीकारेभेरीचक्षुः
संयोगदशायांचक्षुःसंयुक्तसमवायस्यतत्त्वेसत्त्वाद्रूपादिवत्शब्दस्यचाक्षुषापत्तिः। रसादीनामिवशब्द
स्यापिप्रतिबंधकत्वकल्पनेगौरवमितिवाच्यं। रसादीनांप्रातिस्विकरसत्वादिरूपेणप्रतिबंधकत्वकल्प
नापेक्षयायोग्यगुणेषुजातिविशेषंकल्पयित्वाविजातीयगुणत्वेनैवचाक्षुषत्वावच्छिन्नंप्रतिप्रतिबंध
कत्वकल्पनायाऔचित्यात्। तादृशवैजात्यापेक्षयाशब्दस्वीकारेणानच्चाक्षुषापत्तिवारणादीश्वरस्यशब्दस
मवायिकारणत्वकल्पनापेक्षयाशब्दनिष्ठतादृशजातिस्वीकारस्यैवोचितत्वात्। नचतुल्ययुक्त्यास्पा
र्शनप्रतिबंधकतावच्छेदकतयासिद्धजात्यापरस्परसांकर्यात्कथंचित्तादृशजातिसिद्धिः। तथाहि। तादृश
स्पार्शनप्रतिबंधकतावच्छेदकजातिःस्पर्शव्याप्तत्वेनारूपवृत्तिरितराचरूपव्याप्तत्वास्पर्शावृत्तिः रसादौचतयोः
समावेशइतिवाच्यंरूपस्पर्शोभयवृत्तिजातिस्वीकारात्तदवच्छिन्नप्रतिबंधकतावच्छेदकंचाक्षुषत्वस्पार्शन
त्वचएवंरूपत्वेनस्पार्शनंप्रतिस्पर्शत्वेनचाक्षुषंप्रत्यपिप्रतिबंधकत्वकल्पनान्नतयोःस्पार्शनिकचाक्षुषापत्तिः

शि॰प॰टी॰
५

रित्यशेषः। अथास्तु विजातीयगुणत्वेनैव विजातीयगुणचाक्षुषत्वावच्छिन्नं प्रति रूपादीनां हेतुता।
एवं स्पर्शत्वेन चाक्षुषं प्रति निरूपत्वेन स्पार्शनं प्रत्यपि प्रतिबंधकत्वमिति विनिगमनाविरहः पूर्वमनेकारणा
तावच्छेदकस्य गुरुतया साम्यादिति चेन्न। अस्तु एवमपि शब्दे चाक्षुषापादकाभावाद्विजातीयगुणान्य
विषयकचाक्षुषस्यापि प्रसिध्या रसादीतरापत्तेः विजातीयगुणत्वेन हेतुत्वकल्पनपापावारणासंभवाच्चेत्य
पि वदंति। अथातिरिक्ताकाशानभ्युपगमे किं श्रोत्रं पदार्थस्यानन्तमन्यानेकर्णविवरावच्छिन्नमभोभागस्यै
व श्रोत्रेंद्रियत्वात् इत्यत आह श्रोत्रमपीति। तथा च तादृशांबरसमवाय एव शब्दग्रहे प्रत्यासत्तिः। वस्तु
तस्तु। शब्दग्रहे श्रोत्रसमवायस्य हेतुत्वे मानाभावः। तद्ग्राहकान्वयव्यतिरेकाभावात्। प्रत्यक्षे इंद्रियसं
निकर्षजन्यत्वनियमे मानाभावात्। परं तु देशांतरस्थस्यकाशीस्थ शब्दप्रत्यक्षवारणाय तत्पुरुषीय शब्द
लौकिकप्रत्यक्षत्वावच्छिन्नं प्रति स्वावच्छेद्यत्वसंबंधेन तत्कर्णत्वेन तत्कर्णविवरावच्छिन्नशब्दत्वेनैव वा तादात्म्यप्र श्री रामः
त्यासत्त्या हेतुत्वं कल्प्यते। एवं शब्दत्वादिप्रत्यक्षे तत्कर्णस्य स्वावच्छेद्यसमवेतत्वसंबंधेन हेतुत्वं कल्प्यते। ननु ५
श्रोत्रसमवेतसमवायत्वेन। अथैवं शब्दे समवेतत्वमस्तु। तस्य समवेतत्वे मानाभावात्। जन्यभावे समवेतत्व

नियमस्याप्रयोजकत्वात् इति चेदस्तु किं तेन यदि न सिद्धांतभंगभीतिः। अथवा करणप्राकृत्यं शब्दस्यावच्छे
दकत्वेन स्वीक्रियते। किंतु समवाय एवावच्छेदकतानियामकस्यैव समवायनियामकत्वाभ्युपगमात्। इत्थं च
प्रागुक्ततत्समवेतत्वस्वस्वयोः करणसमवायतन्त्वसमवेतसमवाययोरेव हेतुत्वमभ्युपपत्तेः कापि स्पर्शवृत्त्यस्य समवायि
नत इंद्रियीयपुरुषककर्तौ तु साहान्नातिप्रसंगः इति कृतं पल्लवितेन। परेषां अतिरिक्ताकाशाभ्युपगन्तॄणां। मनसोऽ
तिरिक्तत्वं खंडयति। मनोपि चेत्यादि। तथा च परसमवेतेन मतेन प्राचीनमते परमाणुस्वरूपं नवीनमते त्रुटिस्वरूपं तद्
वमनः परवाच्यमित्यर्थः। अतिरिक्तमनःकल्पने गौरवमिति भावः। क्वचित् समवेतं मूर्त्तमित्यपि पाठः। तत्र मूर्त्तप
दं मूर्त्तविशेषपरं। तथा च मनोऽसमवेतं मूर्त्तविशेषो मूर्त्तात्मकमूर्त्तमिति यावत्। अत्र च मनसोऽसमवेतपर्यन्तानुधा
वनेन तस्य सूक्ष्मत्वसिद्धांतरक्षणार्थमिति ध्येयं। ननु मनसोऽतिरिक्तत्वानभ्युपगमे घटादौ चक्षुःसंयोगात् त्वक्संयोगा
दिसत्वे एकदा ज्ञानद्वयोत्पत्त्यापत्तिः। नवीनमते मनसः त्रसरेणुरूपतया तस्य च महत्त्वेन एकदा चक्षुर्मनोयोगादी
नां संभवेन नानाज्ञानोत्पत्तौ नानेंद्रियमनोयोगात् प्रकारान्तरस्यापि तदानीं विद्यमानत्वादित्यत आह। अदृष्टेति।
तथा चातिरिक्तमनोऽभ्युपगन्तॄणामपि यदा मनसा सह चक्षुःसंयोगस्तदा त्वचा सह संयोगस्तस्य कथं नोत्पद्यते अति

शि.प.टी.
६

श्रीरामः
६

तत्रादृष्टविशेषस्यानियामकत्वावश्यकत्वेऽनुपपत्त्यभावात् मन्मतेपि न तत्त्वज्ञानोत्पत्तौ तत्रादृष्टविशेषस्य नियामकत्वकल्पनेनैवैकदा ज्ञानद्वययौगपद्यापत्तिवारणसंभवात् इति भावः। इदमत्र विचारयामः। अतिरिक्तमनसोऽनभ्युपगमे विनिगमनाविरहेण मनसो नानापरमाणुरूपत्वया नानात्रुटिरूपत्वापाता एवं पुरुषीयात्ममानसत्वावच्छिन्नं प्रति एतत्पुरुषीयमनःसंयोगादिहेतुतायां नानापरार्ध्यपुरुषवृत्तेरेकत्वकल्पने गौरवं दुष्परिहरमेव। मनसोऽतिरिक्तत्वकल्पने तु एकत्र तत्त्ववृत्तेरेकत्वकल्पने लाघवस्यातिस्फुटत्वात् इति। न च तत्र मनःसंयोगस्य विजातीयसंयोगत्वेन हेतुत्वकल्पनान्नोपदर्शितगौरवावकाश इति वाच्यम्। तथापि विनिगमनाविरहेण संयोगसंबंधेन मनसोऽपि हेतुत्वेन न परमाणुत्रुटिष्वकारणत्वकल्पनप्रयुक्तगौरवस्य दुःसमाधेयत्वात्। अत्र केचित्। इत्थं लौकिकप्रत्यक्षत्वावच्छिन्नं प्रति इन्द्रियसंयोगस्य विजातीयसंयोगत्वेन हेतुत्वस्य सामान्यतः कल्पनात्तेनैव संनिकृष्टात्मप्रत्यक्षवारणसंभवे आत्ममानसत्वावच्छिन्नं प्रति मनःसंयोगत्वेन हेतुतायां मानाभाव इति नातिरिक्तमनसोऽनभ्युपगमे उपदर्शितगौरवप्रसंगः। तथाविधसामान्यकार्यकारणभावावश्यकत्वं निरुक्तिप्रकाशेऽभिहितमिति ग्रंथगौरवान्नेह प्रपञ्चितमिति दिक्। ते चेति। चास्तुषड्व्यसमवायिनश्चेत्यर्थः। अन्यथाऽ

प्रयोजकादृष्टानुमानात्सहार्थसिद्धौ। नाहं शोत्यादि। परमाणुः सम्भेतः चाक्षुषद्रव्यसमवायिसमवायित्वात्क-
पालिकावदित्यनुमानेनेत्यर्थः ॥ अथ परमाणुद्व्यणुकानेगौ कारे द्रव्यचाक्षुषे चक्षुःसंयोगस्य द्रव्यसमवेतचा-
क्षुषे चक्षुःसंयुक्तसमवायस्य च हेतुत्वकल्पनायां गौरवं तदभ्युपगमे समवायसत्त्वेनैव तच्चाक्षुषत्वोपपत्तेस्त-
योर्हेतुताकल्पने लाघवमेव तन्निद्धावनुकूलस्तर्कः इति नाप्रयोजकत्वमिति। न चातीन्द्रियघटितसंनिकर्षा-
द्रूपत्वादिचाक्षुषवारणाय द्रव्यान्यसमवेतचाक्षुषे चक्षुःसंयुक्तसमवेतत्वाक्षुषवन्निरूपितसमसमवायत्वेने-
व हेतुत्वकल्पना तेन त्रुटिचाक्षुषासंग्रहात्संयोगहेतुत्वमावश्यकमिति वाच्यं। इत्थमपि द्रव्यान्यसमवेतचाक्षु-
षत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवेतोपष्ट्वाक्षुषविषयस्तन्निरूपितसमवायत्वेन द्रव्यचाक्षुषत्वाव-
च्छिन्नं प्रति चक्षुःसंयोगत्वेन हेतुत्वकल्पना हेवोपपत्तौ संयुक्तसमवायस्य हेतुताकल्पनानन्त्रसरेणौ द्रव्य-
त्वादिचाक्षुषानुरोधेन द्व्यणुकसिद्धेरावश्यकत्वादिति चेन्न। द्व्यणुकाभ्युपगमेन हृटितसंनिकर्षाद्रूपत्वादि-
चाक्षुषवारणाय चाक्षुषत्वसमवेतयोः संयुक्तसमवेतसमवायहेतुतायां समवेतांशे चाक्षुषविषयतायां निवे-
शस्यावश्यकतया कारणतावच्छेदककोटिप्रविष्टयोः चाक्षुषत्वसमवेतयोर्मिथो विशेष्यविशेषणभाव

सि॰मु॰टी॰
७

विनिगमनाविरहेणकारणताद्वयकल्पनापत्तिरवच्छेदकगौरवंचेतितन्नरूपेस्यादित्यन्यस्मिन्वर्ततेयत्ताद्वि
षयकचाक्षुषत्वावच्छिन्नंप्रतिचक्षुःसंयुक्तसमवेतसमवायत्वेनद्रव्यसमवेतचाक्षुषत्वावच्छिन्नंप्रतिचक्षुः
संयुक्तसमवायत्वेनद्रव्यचाक्षुषत्वावच्छिन्नंप्रतिचक्षुःसंयोगत्वेनहेतुत्वकल्पनंसमुचितमेव।नचमव
न्मतेवायुघटितसन्निकर्षात्संयोगप्रत्यक्षवारणायचाक्षुषविषयतायांनिवेशस्यावश्यकत्वंइतिवाच्यम्।
याकारितानोरूपघटघटितसन्निकर्षात्संयोगत्वसंख्यात्वादिप्रत्यक्षवारणायचाक्षुषविषयतानिवेशेपि
संयुक्तांशेरूपनिवेशस्यावश्यकत्वात्रूपवच्चक्षुःसंयुक्तसमवेतसमवायाभावादेवतद्वारणात्।नचचक्षुरिं
द्रियघटितसन्निकर्षाद्रूपत्वादिचाक्षुषवारणायानुद्भूतरूपाभावाद्यविशेषापेक्षयाचाक्षुषविषयतानिवेश
स्यावश्यकइतिवाच्यम्।अनुद्भूतरूपस्पर्शाधिनिकृतैवाय्वेनिरसनीयत्वादिति।अथावयविनिपाकानभ्युप
गमेरूपनिवेशस्यावश्यकत्वाच्चाक्षुषविषयतेववाय्वादिघटितसन्निकर्षात्संयोगत्वादिचाक्षुषवारणायनि
वेश्यते।।तथाचसंयुक्तसमवायस्यहेतुत्वाकल्पनप्रयुक्तलाघवपतेववाय्वादिघटितसन्निकर्षात्संयोगत्वा
दिचाक्षुषवारणायनिवेश्यते।।तथाचसंयुक्तसमवायस्यहेतुत्वाकल्पनप्रयुक्तंलाघवमस्त्येवेतिचेन्न।

श्री रामः
७

विजातीयचक्षुःसंयोगाश्रयसमवेतसमवायत्वादिनैव हेतुत्वकल्पनाद्यापत्तेः। विजातीयचक्षुःसंयोगानभ्यु
पगमेनैव तद्घटितसन्निकर्षसंयोगत्वादिना तत्कारणत्वं मन्मते रूपाद्यनिवेशात्। भवन्मते द्व्यणुकघ
टितसन्निकर्षाद्रूपत्वादिचाक्षुषवारणाय चाक्षुषविषयतानिवेशस्य महत्त्वानिवेशस्य चावश्यकत्वेन
पूर्वोक्तगौरवात्। नच वायुचक्षुःसंयोगादौ वैजात्यानभ्युपगमे तद्घटितसन्निकर्षाद्रूपाभावादिचाक्षुषानु
दयप्रसंगः। अभावप्रत्यक्षेपि विजातीयसंयोगाश्रयविशेषणताया एव हेतुत्वादिति वाच्यम्। अभावचा
क्षुषजनकतावच्छेदकतया वैजात्यान्तरस्वीकारात्। नच मयापि द्व्यणुकचक्षुःसंयोगे वैजात्यानभ्युपग
मात्तद्घटितसन्निकर्षाद्रूपत्वादिनां चाक्षुषापत्तिरिति वाच्यम्। त्रसरेणोर्द्व्यणुत्वचाक्षुषानुरोधेन त
थापि द्व्यणुकविजातीयसंयोगस्यावश्याभ्युपेयत्वात्। न च चाक्षुषविषयतानिवेशे रूपस्य वैजात्यस्य वा
जनकतावच्छेदककोटिप्रवेशेपि एकघटचक्षुःसंयोगकालेन तद्घटनीलरूपघटान्तरादिरूपादिघटितसन्निक
र्षाद्घटवायुद्व्यणुत्वादिघटितसन्निकर्षाद्घटत्वादिप्रत्यक्षापत्तिरिति चाक्षुषविषयतानिवेश आवश्यक इति
वाच्यम्। स्वविषयप्रकारकप्रत्यक्षं प्रत्येव चाक्षुषाभावादिप्रतिबन्धकमतेनासमवायान्केवलादित्वत्वनिर्विकल्प

कस्वीकारेपिक्षतिविरहान्निर्विकल्पकस्याऽतीन्द्रियत्वस्यातदुत्तरमेनुव्यवसायाद्यापत्त्यभावात्। इत्थंच रूपमपि
न निवेश्यते प्रयोजनाभावात्॥ वस्तुतस्तु॥ यावदाश्रयसंनिकर्षविरहकाले द्वित्वादिस्मृत्यस्यवारणाय विजा
तीयसत्त्वाश्रुषत्वावच्छिन्नप्रतिसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकचक्षुःसंयोगाभावाभावस्य हे
तुत्वकल्प्यनं वस्तदानीं तद्वृत्तिसंनिकर्षादित्वादिचाक्षुषवारणाय तत्र सामानाधिकरण्यसंबंधेन ताह
शचक्षुःसंयोगाभावाभावस्य हेतुतायाः कल्पनीयत्वे विजातीयसत्त्वसमवेतचाक्षुषत्वस्यैव तज्जन्यताव
च्छेदकत्वं स्वीक्रियत इति ताहशहेतुतयैव रूपादिसंनिकर्षविरहदशायां रूपत्वादिचाक्षुषवारणे संयुक्त
समवेतसमवायहेतुत्वेनाभ्युपेयते। नचतथापि चक्षुःसंयुक्तघटवायुद्व्यणुकघटपरमाणुद्वित्वसंनिकर्षा
द्वित्वत्वादिस्मृत्यस्यवारणाय चक्षुःसंयुक्तसमवेतसमवायहेतुत्वं नाभ्युपेयते। नचतथाऽवेतचाक्षुष
वत्समवायत्वेन हेतुत्वमावश्यकमिति वाच्यम्१ ताहशाभावाभावस्यैव वा सामानाधिकरण्यसंबंधेन
हेतुत्वाद्वायुघटसंयोगे च सामानाधिकरण्यसंबंधेन विजातीयसंयोगाभावाभावस्यासत्त्वेन तद्वारणा
त्। इत्थंच द्रव्यत्वादिस्मृत्यस्यानुरोधेन संयुक्तसमवायहेतुत्वं कल्प्यते। त्र्यणुकस्वीकारे च त्र्यणुकघटितेन

संनिकर्षाद् उपाधिचाक्षुषवारणाय तत्र चाक्षुषविषयतानिवेशस्यावश्यकत्वेनैतत्त्रुटिचाक्षुषासंग्र
हात् द्रव्यचाक्षुषे चक्षुः संयोगस्य हेतुत्वमावश्यकमेवेति द्व्यणुकस्वीकारो निरर्थकः चाक्षुषविषय
त्वप्रवेशप्रयुक्तगौरवसंपादकत्वात् तन्मतं पल्लवितेन । अयाणुव्यवहारस्य स्वल्पद्रव्यावलंबनत्वा
भावेन तद्भिन्नद्रव्यविषयकत्वमावश्यकमिति तन्निमित्तसिद्धिरित्यत आह । अणुव्यवहार इत्यादि । स्वाश्रयहेतुषु
परिमाणानिबंधनोऽपकृष्टमहत्त्वाश्रयद्रव्यविषयक इत्यर्थः महत्त्वपीत्यादि ॥ यद्यपेऽपकृष्ट
परिमाणवत्त्वस्य पयात्राणुव्यवहार इत्यर्थः । ईश्वरस्यवेति । जीवानां महत्त्वं प्रत्यक्षसिद्धमित्याशयः ।
तरनमनुपगमेनह्यपितद्ऽतिक्रमेवेति बोध्यं । केचित्तु परमाणुद्व्यणुकाङ्गीकारे आत्मनो महत्त्वमावश्यकं ।
अन्यथा परमाणावाहि प्रत्यक्षवारकमहत्त्वस्य हेतुत्वे आत्ममानसे व्यभिचारः स्यात् आत्मान्यद्रव्यप्र
त्यक्षत्वस्य तज्जन्यतावच्छिन्नत्वप्रतिसामानाधिकरण्यसंबंधेन महत्त्वस्य समवायसंबंधेन विजाती
यमहत्त्वस्य वा हेतुतायां द्रव्यचाक्षुषत्वावच्छिन्नप्रत्येव महत्त्वेन हेतुत्वकल्पनात् ॥ त्रुटिस्पाकस्वी
कारे मनःप्रत्यक्षत्वस्यैव तज्जन्यतावच्छेदकत्वस्वीकारेणात्ममानसप्रत्यक्षे व्यभिचाराभावकाशान्त ।

पृ.टी.र. ८ अथ परमाणुघटसंयोगप्रत्यक्षवारणाय द्रव्यान्यसत्प्रत्यक्षत्वावच्छिन्नं प्रति सामानाधिकरण्यसंबं
धेन महत्त्वाभावस्य प्रतिबंधकत्वकल्पनात् जीवानामीश्वरस्य च महत्त्वानंगीकारेण नादृष्टविशेषेण च स
मानाधिकरण्यसंबंधेन महत्त्वाभावस्य सत्त्वात् प्रत्यक्षानुत्पाद इत्यावश्यकं। चाक्षुषस्पार्शनत्वा
दीनां विशिष्य प्रतिबध्यतावच्छेदकत्वे च कार्यकारणभावयोः कल्प्या इति चेन्न। आवश्यकद्रव्यान्य
समवेतचाक्षुषत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबंधेन चाक्षुषाभावस्य द्रव्यान्यसमवेतस्पार्शनत्वावच्छिन्नं
प्रति स्पार्शनाभावस्य च प्रतिबंधकत्वकल्पनादेव परमाणुघटसंयोगप्रत्यक्षवारणे महत्त्वाभावस्य प्र
तिबंधकत्वाकल्पनात् तयोरावश्यकत्वं नु वायुघटसंयोगगगनघटसंयोगादीनां चाक्षुषस्पार्शनवार
णाय। अथ तत्र रूपाभावस्पर्शाभावयोः प्रतिबंधकत्वेनैव नानुपपत्तिरिति चेन्न। रूपमहत्त्वस्पर्शाभावा
नां प्रतिबंधकतायाश्चावश्यकत्वात्। अत एव प्राचीननैयायिकानामभ्युपगमे रूपाभावादीनां प्रतिबंधकतायां अनावश्य श्रीरामः
कत्वाच्च। न चावयमिति तथाभ्युपगमात्। नैयायिकानां मते घटानुद्भूतरूपादिकं नाभ्युपेयते तत्र रूपस्पर्शा ८
भावयोः प्रतिबंधकतायाश्चावश्यकत्वात् चाक्षुषस्पार्शनाभावापत्तेः द्रव्यान्यसमवेतसत्त्वावच्छिन्नं प्र

त्तिमहत्त्वाभावस्यैवप्रतिबंधकत्वकल्पनेलाघवात्परममहत्त्वंहस्वीकारआवश्यकइतिवाच्यं।एवमपित्रसरे
णुघटसंयोगस्पार्शनवारणायद्रव्यान्यस्पार्शनत्वावच्छिन्नंप्रतिसामानाधिकरण्यसंबंधेनविजातीयमह
त्त्वाभावस्यस्पार्शनाभावस्यवाप्रतिबंधकतायाआवश्यकत्वेद्रव्यान्यसच्चाक्षुषत्वस्यैवमहत्त्वाभावाभाव
जन्यतावच्छेदकत्वाभ्युपगमेनत्वानादिमानसेव्यभिचारानवकाशात्।अस्तुवामानसव्यावृत्तचाक्षुषस्पा
र्शनवृत्तिजातिविशेषएवमहत्त्वाभावाभावजन्यतावच्छेदकइतिआत्ममहत्त्वानभ्युपगमेपिनहानिः।हि
प्रत्यक्षेव्यभिचारइति।नचैवंरूपावैजात्यैमानाभावइतिवाच्यम्।अनंतानामात्मनांमहत्त्वकल्पनापेक्षया
नादृशाजातिकल्पनायाएवसमुचितत्वात्।इत्थंचचाक्षुषेस्पार्शनेचरूपस्पर्शयोर्हेतुत्वंनस्वीक्रियते।वा
य्वादिचाक्षुषस्यप्रभादिस्पार्शनस्यचसच्चाक्षुषस्पार्शनयोःरूपाभावस्पर्शाभावयोः।वायुघटसंयोगादिप्रत्यक्ष
वारणायप्रतिबंधकतायाःसामानाधिकरण्यसंबंधेनकल्पनाद्याद्यवयवपरंपरसाधारण्येनीरूपत्वात्तत्रसा
मानाधिकरण्यसंबंधेनरूपाभावावस्तुत्वादेववारणात्।आत्मादिचाक्षुषस्पार्शनयोश्चमहत्त्वस्यविजाती
यस्यचप्रतिहेतुताकल्पनेनैववारणात्।मन्मतेआत्मादिचाक्षुषवारणायतत्रहेतुतायाआवश्यकत्वात्

पु॰टी॰२॰
१०

गुत्वपिलाघवं। इत्थं च त्रुटिघटसंयोगस्यापि नाभ्युपगमः। अथवाणुपरिमाणस्यैव सामानाधिकरण्यसं
बंधेन द्रव्यान्यसमत्यक्षत्वावच्छिन्नप्रतिबंधकत्वं न न एव परमाणुघटसंयोगप्रत्यक्षवारणे महत्त्वाभा
वस्य प्रतिबंधकत्वाभावान्नात्मादिमहत्त्वसिद्धिः। आत्मादेः परमाणुपरिमाणाभावेन सामानाधिकर
ण्यसंबंधेन तस्याभावो ज्ञानोपाशाशावयविवनेतुइतिव्यभिचारानवकाशात्। न चाणावप्येवं निष्परिमाणाणाः
किं न स्युरिति वाच्यम्। विभूनां महत्त्वाभ्युपगमे महत्त्वाभावाभाववत्वेन हेतुत्वकल्पनायाः कारणतावच्छेदकं
गौरवात्। अणूनां परिमाणाभ्युपगमे तादृशविजातीयपरिमाणाभाववत्वेन हेतुत्वलाघवात्। इत्थं च द्रव्यप्र
त्यक्षत्वावच्छिन्नप्रत्यणुपरिमाणस्यैव समवायसंबंधेनाभावो हेतुरित्यभ्युपेयत इति। वस्तुतस्तु मूर्त
प्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वस्य हेतुत्वकल्पनमात्रेणोपपत्तिर्मूर्तत्वजात्यनभ्युपगमेपि द्रव्यप्रत्यक्षत्वा
वच्छिन्नप्रति महत्त्वस्य हेतुतावलान्नात्ममहत्त्वसिद्धिः। गुरुत्वादेः प्रत्यक्षवारणाय लौकिकप्रत्यक्षत्वा श्री ए॰
वच्छिन्नं प्रति लौकिकविषयताहेतुत्वकल्पनस्यावश्यकतया तेनैव परमाण्वादिप्रत्यक्षवारणात् संभवे म १०
हत्त्वहेतुताकल्पनस्य निर्युक्तिकत्वात्। न चैवं समुपरागीत स्पार्शनविषयत्वाभावाभावादिहेतुताकल्प

नं निर्युक्तिकमिति वाच्यम्। तावतासस्य भावात्। न चान्योन्याश्रयस्यानोपदर्शितकार्यकारणभावकल्प
नं संभवदुक्तिकमिति वाच्यं। विषयतायानित्यत्वेन उत्पन्नावन्योन्याश्रयस्याभावात् परमाणुद्व्यणुका
नंगीकर्तॄणां नव्यानां महत्त्वस्य हेतुताकल्पनैव नास्ति। अप्रामाण्यभावात्। तथा च जीवात्मन्यायमहत्त्वागा
कारो निर्युक्तिक इति निपुणतरमालोचयामः। ननु द्रव्यत्वेन हेतुतापरिमाणत्वं साध्यमित्यत आह द्रव्य
त्वस्येति। अप्रयोजकत्वादित्यादि। प्राचीनाः क्वापि पृथिव्यादीनां रूपादिमत्त्वनियमात् घ्राणेन्द्रियादावप्य
नीन्द्रियरूपादिकं स्वीकुर्वन्ति। तन्मते च घ्राणेन्द्रियादीनामपि महत्त्ववत्त्वान्महत्त्ववत्त्वाच्चक्षुषा प्रत्यक्षापत्तिरिति तन्नि
वारणायोद्भूतरूपस्यैव हेतुत्वमभ्युपेयते। अथ तस्य हेतुतानोद्भूतरूपवत्त्वेन उद्भूतत्वस्यानिर्वचनत्वात्। न चो
द्भूतत्वं जातिः नीलत्वादिना सांकर्यात्। तथाहि। नीलत्वादिजातिरुद्भूतत्वाभाववत् घ्राणेन्द्रियनीलवृत्तिर्द्व
योर्हि पीतव्यावृत्ता इयं तु घटादिपीतवृत्तिर्घ्राणेन्द्रियनीलव्यावृत्ता घटादिवृत्तिर्नीलादौ तयोः संकर इति।
न चोद्भूतत्वं नानैव नीलत्वशुक्लत्वादिव्याप्यभेदादिति वाच्यम्। व्यभिचारात् नाहशयमविच्छेदेन कारण
त्वकल्पनेनासंभवात्। न च नीलवत्सत्यसंप्रति नीलत्वव्याप्योद्भूतत्वेन शुक्लवत्यसंप्रति शुक्लत्वादिव्या

प.रा.२ ष्योद्भूतत्वादिनाहेतुत्वकल्पनान्नव्यभिचार इतीवाच्यं ॥ मानाभावे मात्वादिविषयकपीतघटप्रमायत्तस्यविषयतासंबंधेनतता
१२ दृशघटेप्युत्पत्तेस्तत्रचोद्भूतनीलाभावेनव्यभिचारात् न च नीलत्वप्रकारकादिविषयकत्वाद्युपत्वादेर्जन्यतावच्छेदकत्वा
न्नातादृशघटेतिवाच्यम् । अप्रमीयनीलादिविषयकपीतादिघटप्रमायाः स्वविषयतासंबंधेन तादृशघटेप्युत्पत्ते
स्तत्रचोद्भूतनीलाभावेनव्यभिचारात् । न च नीलत्वलौकिकविषयतायाः कार्यतावच्छेदकत्वान्नतादृशघटेतिवाच्यम् । अत
द्यमाननीलाघटेपि व्यभिचारात् । न च स्वविषयीभूतनीलत्ववद्वृत्तिविषयतायाः प्रत्यासत्तित्वात्पीतघटनिष्ठवि
षयतायाश्च स्वविषयनीलासमानाधिकरणत्वान्नदोष इति वाच्यम् । नहि एतस्य गुरुत्वप्रतिबंधकसमवधानकालीनत
पीतत्वविषयकत्वमस्यासंग्रहात् । तथैव प्राचीनमते एकस्मिन्नवयविनि नानारूपाभावान्नीलत्वस्यापि प्रत्यक्षजन्यताव
च्छेदकत्वसंभवेपि तादृशोद्भूतनीलत्ववत्स्यापि प्रत्यक्षजन्यतावच्छेदकत्वमादाय चित्रगमनाविरह इति । न चोद्भूतत्वस्या
प्यं नीलत्वमेकमस्तु तत्र हि उद्भूतत्वमपरिमितनीलत्वादिकं नानैवेति वाच्यम् । तत्रासति विशेषनीलापोद्भूतनीलत्वावच्छि
न्नं प्रति उद्भूतनीलत्वादिनैवासमवायिकारणस्य हेतुतायाः स्याहिति उद्भूतनीलत्वानुद्भूतनीलत्वानारंभापत्तेस्तद्विरहेणैवजा
त्यावच्छिन्नं प्रत्यपि अनुद्भूतनीलत्वादिना हेतुत्वे कार्यकारणभाववाहुल्यापत्तेरिति मैवं अनुद्भूतरूपेष्वेव नीलत्वा रामः १२

दिव्याघजातीः कल्पयितव्यतत्वावच्छिन्नाभावादीनांमेवाप्रत्युपलाघवच्छिन्नं प्रतिहेतुत्वकल्पनेनागत्। तथाक्नी
लादिजन्यतावच्छेदकजातिव्याप्याघटजातयः पाकजन्यतावच्छेदकव्याप्यव्याप्यघटजातयः इतितदवच्छिन्नाभावकू
टत्वावच्छिन्नंप्रतिहेतुः नीलादिजन्यतावच्छेदकघटपाकजन्यतावच्छेदकव्याप्यघटितिवतुर्विंशतिनीलत्वादयःव्याप्यघट
नत्वानुभूतत्वनीलजन्यपाकजन्यनीलसाधारणामेवैकंनीलादिजन्यतावच्छेदकजातिस्थानानेवेत्येवकिंनस्यात्
इतिवाच्यम्। नव्यास्वनीलजन्यतावच्छेदकघटादशापाकजन्यतावच्छेदकस्पृहारशनीलत्वादयोनुभूतत्वाभिव्यक्ति
हारश्चेतिजातिकल्पनायाआधिक्यात्। वस्तुतस्तु। घ्राणादिग्राह्येपाकानभ्युपगमात् नीलादिजन्यतावच्छेद
कजातिव्याप्याः घटत्वानुभूतत्वजातयः। शुक्लत्वव्याप्येवानुभूतत्वजातिः घ्राणादिग्राह्येशुक्लरूपस्यैवाभ्युपगमा
नुभूतनीलत्वादिप्रत्यक्ष्यापत्तमाशापार्थिवविगामनाविरहइतिवाच्यम्। रसनादौशुक्लरूपस्यैवसत्त्वेनतत्त्वात्सं
भवात्। नचघ्राणोद्ग्राह्याद्यापिपाकादिनानीलाद्युत्पत्तौबाधकाभावइतिवाच्यम्। तत्रतथापाकानभ्युपगमा
त्। एवंशुक्लरूपस्यापाकमेवपरमाणुघ्राणारंभकइतिनानुपपत्तिः। गंधोपि। अथवाघ्राणादिरूपेष्वनभ्युपगम
त्वजातिविनाभ्युपेयते। स्पार्शनवायुप्रसाधारणाप्रत्यक्षत्वावच्छिन्नंप्रतिअनुभूतानुस्पार्शनत्वप्रत्यक्षप्र

तिबंधकत्वकल्पनाद्वैवं तत्त्वात्सुखवारणात्तत्रस्यमनुभूत रीतितोऽस्य स्पर्शयोरेपि स्पार्शनप्रतिप्रतिबंधकत्वान्तरस्यनैव
प.ही.र. यत्र भास्यार्थमापत्तिः। अननुभूतमधुकस्य वा मधुप्रतिबंधकत्वात् मधुरिं द्रियादीनी भवत्सुखमिति तत्त्वारणव
१३ कार्यकारणभावात्। अथ यानि यानारंभकत्वे घ्राणादिनीलस्य प्रतिबंधकत्वे नीलपीतादिसाधारणमनुभूतत्वमे
कमेव नीलत्वादिकं तु माभावात् अत्र अनुभूतत्वस्य नानात्वे प्रत्यक्षस्थलीयकारणताबाहुल्यापत्तेः। नीलत्वा
दिना नीलत्वेन समवायिकारणताया ह्यस्येति प्रत्यक्षकार्यकारणभावेकारणतावच्छेदकगौरवेण तादृशकारण
तायाः आधिक्ये अतीव गौरवादिति चेन्न। एतन्मते जातिकल्पनापा आधिक्यान्नकारणत्वकल्पनाधिक्यात्।
तथाहि। अनुभूतत्वमेकं नीलत्वादयो नीलत्वादि जन्यतावच्छेदकं ज्ञानपक्षे तद्व्याप्यविरुद्धभेदेन तादृश्या
कजन्यतावच्छेदिका अपि व्याप्यविरुद्धतादृशेति समस्त्रिधा ज्ञानत्व४। प्रत्यक्षानुभूतरूपाभावपौरविकोपर्यका
रणभावः। नीलादीनां तादृशोतिकार्यकारणभावाः। अनुभूतत्वज्ञानेन नानात्वकल्पने नीलत्वादयः४ षड्जातयः अ
जन्यतावच्छेदकमात्रपक्षे षट्पाकजन्यतावच्छेदिका षट्। अनुभूतत्वाति यद्वा तादृशपाकजन्यतावच्छेदकं जातिव्या राम०
प्यविरुद्धभेदेनेति त्रिधा ज्ञानपक्षः रूपपाकयोर्द्वेधा। अनुभूतरूपाभावस्य च प्रत्यक्षं प्रतितादृशकार्यकारण १३

भावादिति चेन्नु विधातिरेकान्नचैवमेतत्कल्पे घ्राणग्राह्यपाकानभ्युपगमे सतिविरहेण पाकजन्यतावच्छेदकजा
तयः तत्कार्यकारणभावाक्षुण्णत्वेवतिवाच्यं। घ्राणारंभकपरमाणुनीलादिनापाकजन्यत्वस्यावश्यकत्वात्। तत्र
चानुभूतत्वजातेरस्वीकारेणतोऽनुभूतरूपानारंभकत्वेऽतत्स्वीकारस्यावश्यकत्वेन पाघटादिनीलत्वपरमाणुनी
लसाधारणैकजन्यतावच्छेदकजात्यभ्युपगमेऽनुभूतत्वव्याप्यासांकर्यस्यात्। तत्रपाकजन्यतावच्छेदकजा
त्यन्तरग्णनद्रवच्छिन्नप्रतियाकस्यकारणत्वात्कल्पनापावश्यकत्वात्। अतएवतिपतारंभकत्वेऽनुभूतत्वं
जातिरेवैकानीलत्वं तत्तद्व्याप्यविरुद्धभेदेन नानेत्यपि निरस्तमुक्तेश्चेत्तु। घ्राणादिरूपादेर्नीलत्वादिजातिसत्वेमा
नाभावान्नीलत्वादिविरुद्धमेवानुभूतत्वमेकतदवच्छिन्नाभावस्यचैकमेवहेतुत्वं वस्तुतस्तुतद्व्यापकमनुभूतत्वं
जातिः अनुभूतत्वस्यतद्व्याप्यत्वेनतदवच्छिन्नाभावरूपयोर्हेतुताद्वयकल्पनापेक्षयाऽनुभूतत्वेनैवहेतुत्वकल्पना
याउचितत्वात्। अथवानुभूतनीलत्वव्याप्यपृथिवीस्पर्शमात्रवृत्तिजातिविशेषकल्पयितव्यानादृष्टाविजा
तीयस्पर्शत्वेनपृथिवीप्रत्यक्षंप्रतिचाक्षुषस्पार्शनसाधारणमेकैककार्यकारणभावः कल्प्यते। एवंजलते
जोवृत्तिजातिविशेषकल्पयितव्यानादृष्टवैजात्यावच्छिन्नचाक्षुषंप्रतिप्रकृतव्याप्यीभूतत्वेनहेतुता। एवम

प॰ रा॰ र॰ १४ त्स्पार्शनं प्रति उद्भूतरूपवत्त्वेन तेजस्स्पार्शनं प्रति उद्भूतस्पर्शवत्त्वेन हेतुता कल्प्यते । उपदर्शितप्रत्यक्षत्वा
वच्छिन्नं प्रति अनुद्भूतानुद्भूतस्पर्शादिना प्रतिबंधकत्वकल्पनेपि तु तत्कार्यकारणभावकल्पनायाः साम्येपि रूपस्य
हेतुत्वकल्पनाधिक्येन गौरवादिति वदंतीति प्राचीनमतं दूषयन्ति । रूपादीनामित्यादिना अन्तर्गतयोग्यत्वेलौ
किकसाक्षात्कारस्वरूपयोग्यत्वेन यावद्रूपादिकं जन्यसाक्षात्कारयोग्यं न वेति विप्रतिपत्तिः । तत्र च विधौ
पक्षतावच्छेदकस्य पावाद्यवच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् अंशतः सिद्धसाधनं दोषः । निषेधे सामानाधिकरण्ये
न सिद्धेरुद्देश्यत्वात् अंशतो बाधो दोषः । साक्षात्कारे जन्यत्वनिवेशात् ईश्वरप्रत्यक्षमादाय बाधः । योग्यत्वं च
व्यक्तव्याप्यव्याप्ययोग्यजातिसामानाधिकरण्यमयोग्यजातिसमानाधिकरण्यं वा प्राचीनमते रूपादीनाम
योग्यत्वं च रूपत्वादिजातिसामानाधिकरण्याभ्युपगमेन सिद्धसाधनं अवकाशात् । रूपत्वादिकमिदं योग्यताघट
त्विन वेत्याहुर्योपि वोध्याः । अथ यावद्रूपादिना चक्षुरादेर्रसादिजनने बाधकाभावादिति चेत् रूपत्वावच्छिन्नं
प्रति चक्षुरादिना प्रतिबंधकत्वकल्पनात् तच्च नेदं गौरवमिति वाच्यम् । मन्मते अनुद्भूतरूपादीनां घटादावु
त्पत्तिवारणाय तत्र चक्षुरादीनां हि तत्कल्पनाया आवश्यकत्वात् नवरूपादिकं प्रति च चक्षुर्भिन्नत्वादिना हेतु राम॰ १४

त्वेऽवच्छेदकगौरवात्तद्रूपेस्पपालाघवादनुगतरूपंप्रतिचस्पर्शादिनाहेतुत्वकल्पनेनमुचितमितिवाच्यम्।
भर्जनकपालस्थकत्वादावपिअनुगतरूपेणसामभिचारात्तत्वस्यसमवेतेनानुगतरूपत्वादिनीत्यैवभवन्मतेच
स्पर्शादिजन्यतावच्छेदकत्वस्वीकारेणगौरवात्तेनचानुगतरूपत्वेनगौकारेमतेरूपत्वस्यतिन्नसाधारणतयाजन्यताव
वच्छेदकत्वेनजन्यरूपत्वादिकमेवजन्यतावच्छेदकंवाच्यम्।तत्रजन्यत्वंप्रागभावप्रतियोगित्वंकालिकसंबंधेनद्रव्य
द्रव्यत्वंवेतिविनिगमनाविरहेणतेनगौरवमितिवाच्यम्।पृथिवीरूपत्वत्वेजात्यसस्यसंकुलत्वमाध्यजातेरेवद्विवा
दिप्रतिबन्धकतावच्छेदकत्वात्।अन्यस्यअनुगतानावहेतुत्वस्यानुगतरूपादिनिष्ठकारणत्वकल्पनापेक्षया
तन्नकल्पनायाएवोचितत्वात्।अथनीरूपद्रव्येस्पर्शतूष्णवतन्तादृशजात्यवच्छिन्नोत्पत्तिवारणायतज्जातिविशेषा
वच्छेदेनरूपस्यापिस्पर्शजातिविशेषावच्छेदेनस्पर्शस्येवएकैकस्यैवकार्यत्वाद्युगपदेककार्यकारणाभा
वबाहुल्यापेक्षयाचास्तुरूपस्पर्शसाधारणजात्यवच्छिन्नेप्रतिचस्पर्शादीनांप्रतिबन्धकत्वंसमुचितमिति।तथा
भावपत्वरूपादिनाचस्पर्शादेरूपादिकंजनयतांवतेयोंचवाच्यस्पर्शाभावादीनांप्रतिबन्धकत्वात्तचास्पर्शादिः।अनु
गतत्वादिजात्यभ्युपगमानुपपन्नतदवच्छिन्ननिष्पकारणादिकल्पनागौरवअनुगतत्वमपकारआपापत्तेरिति

वंधनइतिचेन्नस्पुराद्यारंभकपरमाणत्वंनीरूपत्वाद्यभ्युपगमेक्षतिविरहात्ताहशपरमाणुभिश्चरूपवद्द्रव्यांतरानां
रंभादितिसंक्षेपः।ननुजन्यद्रव्यत्वावच्छिन्नंप्रतिस्पर्शवत्त्वेनसमवायिकारणतयास्पुराद्यवयवानामनुभूतस्प
र्शाश्रयत्वकल्पनात्ताहशहेतुत्वाकल्पनेगगनादिनाद्रव्यारंभापत्तेरित्यतआह।अतींद्रियेतिअतींद्रियमनोनभ्यु
गमेनेदम्।नचताहशजातिरप्रामाणिकीत्याह।मूर्त्तत्वमिति।स्पंदत्वावच्छिन्नंप्रतिमूर्त्तत्वेनहेतुत्वाकल्पनेग
गनादावपिस्पंदापत्तेरितिभावः।वस्तुतस्तु।नाद्यायुक्तिः।किंचित्करीगगनादौस्पंदसमवायिकारणवि
जातीयमिथ्यात्वादीनामनभ्युपगमाद्वैजात्यकल्पनाभावात्।नचक्रियाविशेषंप्रतिमूर्तवदात्मसंयोगादीनां
हेतुत्वकल्पनात्ताहशसंयोगस्यचात्मन्यपिसत्वात्तत्रस्पंदवारणायआत्मभेदविशिष्टसंयोगत्वेनहेतुत्वक
ल्पनापेक्षयाविनिगमनाविरहेणकारणतावच्छेदककल्पनावच्छेदकगौरवाच्चमूर्तद्वयेक्षणामूर्तत्वेनहेतुत्वकल्पनाया
लाघवोचितत्वात्ताहशजातिसिद्धिरितिवाच्यं।तत्रविजातीयसंयोगसंबंधेनात्मनएवहेतुत्वकल्पनायांजन्नसंबंधेनस्व
स्मिन्स्वासत्वादेवापत्त्यभावात्इतिबोध्यम्।परंतुवायुप्रत्यक्षानंगीकारकल्पेरूपस्यात्मभिन्नद्रव्यप्रत्यक्षत्वावच्छिन्न
प्रतिहेतुत्वकल्पनेऽवच्छेदकगौरवान्मूर्त्तप्रत्यक्षत्वस्यैवतज्जन्यतावच्छेदकत्वौचित्यात्ताहशजातिसिद्धिःतच

मानसत्वाहत्त्राश्रयत्वसत्तिव्याप्यजातिविशेषएवसिद्ध्यतुं तज्जन्यतावच्छेदकतयेति किंमनस्त्वजात्येतिवाच्यमविनि
गमकत्वाविरहेणोवतत्सिद्धेरिति ॥ ननु मनस्त्वेन सह तुल्यव्यक्तिवृत्तितया कथं मनस्त्वं जातिरित्यत आह ॥ मतांत्व
मपीहैतवेति । मनसोगगनस्यानणुगमाहिति भावः ॥ समवेतेनेति आत्मत्वजातिमादाय तन्मूर्तिव्याप्तिवार
णाय परमाणुत्वेत्रैवातिव्याप्तिवारणाय समवेतेति । इंद्रियविशेषणं । सत्तादिजातिमादाय अतिप्रसंगवारणाय द्र
व्यत्वव्याप्येति द्रव्यत्वस्यान्योन्याभावप्रतियोगितावच्छेदकाप्येकं घटाद्यात्मसंयोगादिकमादायातिप्रसंगवार
णायजन्येति ॥ तत्र्याप्येका तत्त्वं च समवायेन बोध्यमिति । केचित्तु समवेतेनाश्रवसः सविनः । सकलाद्वृत्तीयी
ध्वपेक्षापक्षेवाद्रव्यपकृमजातिविशेषस्यैव मनःपदशक्यतावच्छेदकत्वं समुचितमिति ननु मनस्त्व
जातेर्द्रव्यसमवायिकारणतावच्छेदकत्वेऽप्यपि द्रव्यारंभापत्तिरित्यत आह ॥ अन्यावयवीति समानेति ।
स्पर्शवत्त्वेन कारणतायाअपि सहकारित्वेन रविरहेणात्यावयवित्वेन द्रव्योत्पत्तिरित्यर्थः यद्वा वाच्यमानानुसह
कार्यंतरं वात्मावयविभेदादिः अथवासम्भवपक्षेत्वस्यैकस्याभावात् कथं नद्रव्यविच्छिन्नमेदहेन हेतुना । नच
द्रव्यसमवायत्वमनंतत् इतरकारणसत्वेनतत्र द्रव्यसमवायित्वस्यैवाग्यपीवाधान पहीरहमयुक्तंतस्य

द्रव्यवहत्यपर्यवसानाद् दाकाररूपस्यावश्यं वाच्यत्वात्। अन्यथा सुखादिकं प्रति चाक्षुषविषयान्यत्वादिना प्रतिबंधक
त्वादेर्वीनीरूपादीनां चाक्षुषवारणाय यत्नेऽरूपमहत्त्वादिहेतुना विलोपप्रसंगात्॥ अन्यत्र च बहुतरकारणाना
विलयप्रसंगादिति चेन्न अनायत्याघ्रत्वादिना विशिष्यप्रतिबंधकत्वस्वीकारात्। अन्यथा जन्यद्रव्यत्वावच्छिन्नं
प्रति विजातीयैकत्वव्यत्वेनैव हेतुत्वमभ्युपगत्तो भेपावयविनामेकत्वेतां इयावैजात्यमानभ्युपगमएवनतत्र द्रव्यो
त्पादप्राप्तिरितिमयागभावविरहेणानद्रव्योत्पादइत्यस्य १ वस्तुनस्तु विजातीयसंयोगस्यासमवायिकारणस्य विरहा
देव न तत्र द्रव्योत्पाद इति तु समीचीनं। पृथक्त्वस्य गुणत्वं निराकरोति। पृथक्त्वमपीति। घटात्पटः पृथगिति प्र
तीतिप्रकारो गुणपदवाच्योनेत्यर्थः। प्रमाणाभावादिति भावः। यत्तु न गुणो नरमितस्य गुणत्वजात्यभावव
ह्नित्यर्थ इति मन्न। गुणत्वेजातित्वस्याग्रे निराकरिष्यन्त्वेनन पथ्याख्यानुमेयकालत्वा ननु पृथग्व्यवहारविष
यस्यात्यत्रकृताप्यंतर्भावासंभवेनान्यथानुपपत्त्या गुणपदवाच्यतास्तु यत्र मन्त्रावह्य्यकइत्यत आह अन्योन्ये
तिननु पृथक्त्वे नाभावः सावधित्वात् इत्यनुमानेन न तत्राभावत्वाभावसिद्धिर्यनाभावपदार्थ्य इति गवि नेत्यत आह।
पृथक्त्वप्रतीतिरित्यपि। न सावधित्वावलंबनेति। न सावधिनत्वविशिष्टधर्मविषयिणीत्यर्थः। तथा चोपदर्शप

दर्शितानुमाने हेत्वसिद्धिरिति भावः। ननु सावधित्वानंगीकारे घटात्पटः पृथगित्यत्र पंचम्यर्थावधित्वान्वयानुपपत्ति
स्तथा च पृथक्पदसमभिव्याहारे पंचमीविधायकसूत्रे निष्फलम् १ न च तत्र पंचम्याः प्रतियोगित्वार्थकतया तस्य चान्वा
द्वाराबोधेऽन्यबोधविषयीभूताभावेऽन्वयसंभवे न तत्कापि अनुपपत्तिरिति वाच्यम्। तथा सति घटात्पटः
पृथगित्यस्येव घटान्न पट इति प्रयोगापत्तेः। घटादिन्नेत्यादौ पंचम्यनुपपत्त्याऽन्यारादितरर्ते इति पंचमीविधा
यकसूत्रेऽन्यपदस्यान्यत्वबोधकपरत्वस्यावश्यकत्वेन तत्र प्रयोगेऽपि पंचम्याः संभवात्। इत्यत आह घटादि
त्यादि। घटात्पृथगित्यादौ पृथगादिशब्दयोगे पंचम्यनुशासनसिद्धेत्यर्थः। तथा चोपदर्शितसूत्रेऽन्यप
दं विशिष्य पृथगादिपदपरं। भेदत्वस्य बोधकपदसामान्यपरमिति भावः ४। परत्वापरत्वयोर्गुणान्तरत्वं निरस्य, ततोऽपर
त्वापरत्वेऽपीति। परापरव्यवहारस्य कारणत्वे इत्यर्थः। न गुणान्तरे। न संयोगादिभिन्ने १ ननु न हि विप्रकृष्टसंनि
कृष्टयोः स्वेषुक्तनिषयोर्मूर्त्तयमस्मात्परः अयमस्मादपर इत्यादिव्यवहारः कथं तत्राह। विप्रकृष्टत्यादि। विप्र
कृष्टत्वसंनिकृष्टत्वाभ्यां बहुतरसंयुक्तसंयोगाल्पतरसंयुक्तसंयोगाभ्यामित्यर्थः। तथा च न विप्रकृष्टसंनिकृ
ष्टयोः परापरबुद्धिप्रकारतया हेतुः परत्वापरत्वे संयोगातिरिक्तगुणरूपे सिद्ध्यत इति भावः। ज्येष्ठत्वकनिष्ठ

प.रा.र.
१८

त्वाभ्यां तत्प्रागभावाधिकरणक्षणावृत्तित्वरूपतत्प्रेष्ठत्वस्वोत्पत्तिक्षणावृत्तिध्वंसप्रतियोगिक्षणावृत्तित्वरूपत
त्कनिष्ठत्वाभ्यां। तथा च ज्येष्ठकनिष्ठयोः परापरत्वबुद्धिः कारणतया कालिकपरत्वापरत्वे गुणरूपे सिद्धे इति भावः।
तथाविधव्यवहारोपपत्तेः उपहरति स्थले परापरव्यवहारोपपत्तेरित्यर्थः। आद्येऽपीति विप्रकृष्टत्वसंनिकृष्टत्वे
तृतीये तृतीयं द्वयोरप्येतदन्तरमिति। प्रयागतः काश्योपि प्रकृष्टा मथुरा मथुरातः काशी संनिकृष्टः प्रयाग इति व्य
वहाराद्धिति भावः। अन्ये ज्येष्ठत्वकनिष्ठत्वे परस्पराश्रयमिति अपेक्ष्यतत्त्वपनुषंगः। तथा च ज्येष्ठत्वव्यवहारेणा
कनिष्ठत्वाश्रयः विषयीक्रियते कनिष्ठत्वव्यवहारेण ज्येष्ठत्वाश्रयो विषयीक्रियते। नत्वन्यमरणानुयोगारमोरणमात्व
निष्ठोलक्षणाः इति व्यवहारादिति भावः। विशेषोपि न परापर्यान्तरमिति न इत्यादि पंचभिन्नो भाव इत्यर्थः। ननु स
मवायित्वे सति समवायियच्छातेर्पहाप्त्वं तेन परस्परासमवेतत्वसमवेतत्वद्रव्यधर्मसमवायीति व्याप्तिरूर्ध्व दयत्याह
वधारितेति। अत्र च सत्तादिकमादाय सिद्धसाधनवारणाय परस्परासमवेतेति। एकत्वादिमादाय सिद्धसाधनवारणा
य समवेतत्वमन्त्येति। प्रमेयत्वादिकमादाय तद्वारणाय समवायीति। अभावे व्यभिचारवारणाय हेतौ समवायित्वे सती
ति। घटपटसमवायित्वविशिष्टाभावव्यावृत्तेः सत्त्वेन हेतुसत्त्वात् साध्यासत्त्वेन व्यभिचारस्यात्र हेतौ समवायी राम
१८

त्ति। नन्वाघ्नमाह शङ्काभिलाप्यज्ञानीयपनिमव्याप्ययोः परस्परासमवेतसमवेतव्याप्यधर्मसिद्धेरन्यथादित्तिरिक्त
विशेषसिद्धिरित्यत आह विनापीति व्यावर्त्तकधर्ममिति। समवायेन व्यावर्त्तकधर्ममित्यर्थः। परेषां त्वतिरि
क्तविशेषस्वीकर्त्तॄणां स्वत एवेति तादात्म्येनैवेत्यर्थः। व्यावृत्तानाम् परस्परव्यावृत्तिबुद्धिजननादित्यर्थः। तथा
चोपदर्शितव्यावर्त्तकप्रयोजकतया शक्यविषयाणां कल्प्यैव तर्कैरसिद्धत्वामिति भावः। नन्वतिरिक्तविशेषसिद्धौ योगि
नामप्यस्पष्टबलादित्याशङ्कतोपयोगीन इति काङ्क्षसमाधानं क्रियते। न एवं तर्हीति। नव्यावनेषां तद्विषयकप्रत्यक्षे
मानाभाव इति भावः। रूपादेरव्याप्यवृत्तित्वं व्यवस्थापयति। रूपादिकमिति १ ननु रूपादेरव्याप्यवृत्तित्वांगीकारे स
विषयावृत्तिव्याप्यवृत्तिवृत्तिजातेरव्याप्यवृत्तित्वाभावनियमभंग इत्यत आह। सविषयावृत्तेरित्यादि तत्याप्रम
माणाभावेन तादृशव्याप्तेरभावान्न कोऽपि दोष इति भावः। ननु तथापि रूपादेरव्याप्यवृत्तित्वे प्रमाणाभाव इत्यत आ
ह। पक्षे चेत्यादि १२ पामनीलं नीलं रूपं तत्पावरणैकस्मिन्नधिकरणे उपलभ्यमानयोरकावच्छेदेन विरुद्धयो रक्तनीलयो
रवच्छेदकभेदं विनानुपपन्नतयावच्छेदकभेदकल्पनस्यावश्यकतया किमवच्छिद्य व्याप्यवृत्तित्वेति भावः। रूपादेरव्या
प्यवृत्तित्वमापाद्य लौकिकप्रमाणमुक्त्वा सम्प्रति रूपादौ प्रमाणमप्याह। लोहितं इत्यादिना नानारूपवद्वयवारब्धे घटादौ अ

प॰रा॰र॰ तिरिक्तचित्ररूपवादिनां प्राचां मतं दूषयति। चित्रमपीति। न चातिरिक्तचित्ररूपानंगीकारे चित्रं रूपमिति प्रतीतिः काप
१८ त्तिरित्यत आह। समानाधिकरणेत्यादि। विजातीयरूपसमुदायादव्याप्यवृत्तिनीलपीतादिसमूहादिमत्त्वं। तथा
विधव्यवहारोपपत्तेः। चित्रमिति प्रतीतेरुपपत्तेरित्यर्थः। ननु चित्रमिति प्रतीतीनां सर्वत्र नानारूपविषयकत्वकल्पने गौ
रवान्न रूपहानं नीलाद्यतिरिक्तैकचित्रविषयकत्वकल्पनाया एवौचित्यादिति। तादृशप्रतीतिविषयतया अतिरिक्त
चित्ररूपसिद्धिरस्त्विति चेत्तत्राह। नीलादीत्यादि। नीलादेर्नीलाद्यतिरिक्तरूपाजनकत्वनियमाद्युक्त एवः। तथा चाति
रिक्तचित्ररूपस्वीकारे तादृशनियमभंगप्रसंग इति नानारूपवदवयवैरारब्धे व्याप्यवृत्तिनानारूपस्वीकार एवोचित इ
ति भावः। अत्र प्राचीनानुयायिनः। इदृशनियमस्याप्रयोजकत्वान्नातिरिक्तचित्रे किंचिद्बाधकं। न च चित्ररूपांगीका
रे नीलघटादौ चित्रापत्तिवारणाय चित्रत्वावच्छिन्नं प्रति नीलादिप्रागभावानां स्वाश्रयसमवेतत्वप्रत्यासत्त्यानेक
हेतुत्वकल्पने गौरवमिति वाच्यं तत्राव्याप्यवृत्तिनानाजातीयरूपांगीकर्तृमतेऽपि नीलाद्यवयवावच्छेदेन पीताद्याप
त्तिवारणायावच्छेदकतासंबंधेन नीलादिकं प्रति समवायसंबंधेन नीलादेर्हेतुत्वकल्पनया साम्यात्। ननु तथापि का
रणतावच्छेदकसंबंधादिगौरवप्राकाकलंकितं चित्ररूपवादिमतमिति चेन्न भ्रांतोऽसि। नहि वयमुपदर्शितरीत्यान रामा॰
१८

लाभावत्वादिना हेतुत्वं चित्रत्वावच्छिन्नं प्रति कल्प्यताम्ः येन गौरवशंका स्यात् किंतु स्ववृत्तिप्रागभावप्रतियोगित्व
स्वाश्रयसमवेतसमवेतत्वकालिकविशेषणतैतत्त्रितयसंबंधेन रूपविशिष्टचित्ररूपं प्रति स्वसामानाधिकरण्य
विशिष्टरूपनिष्ठभेदप्रतियोगितावच्छेदकजाति।चित्रत्वान्यतराश्रयसमवायिसमवेतत्वसंबंधेन रूपत्वेन हेतुत्वा
त्तन्नाव्याप्यवृत्तिनानारूपकल्पनापेक्षया गौरवावकाशः। तन्मतेन तत्प्रदर्शितरीत्या नीलादीनां घटकार्यकारणा
भावकल्पनाधिक्यात्। यदि चात्रापि स्वपरार्थपर्यालोचनक्रमेण किंचिद्दोषमुत्पश्यसि तथापि चित्ररूपवादि
मतमेव समीचीनम्। तथाहि विजातीयनानारूपवदवयवारब्धे घटादावव्याप्यवृत्तिनानाजातीयरूपांगीकारे नीला
द्यवयवावच्छेदेन पीतादिवारणायावच्छेदकतासंबंधेन पीतादिकं प्रति समवायसंबंधेन पीतादीनां घटकार्यका
रणाभावकल्पने गौरवं चित्ररूपवादिनये तु सकलनीलपीतादिस्थले चित्रापत्तिवारणाय चित्रत्वावच्छिन्नं प्रति कार्य
कालवृत्तितया चित्रेतररूपाभावत्वेनैकहेतुत्वकल्पने स्फुटमेव लाघवम्० तथा च लाघवतर्कोपोद्बलितप्रमाणसि
द्धं चित्ररूपनियामकांगीकाराणां हरणामप्यवकाशमिति चेद्वहि। न च चित्ररूपवादिमते चित्रघटे नीलाद्युत्पत्तिवारणा
यविजातीयविजातीयनीलादिकं प्रति नीलाभावादेः स्वाश्रयसमवेतत्वप्रयासम्याप्रतिबंधकत्वकल्पने गौरवमि

त्तिवाच्यम्। तस्मात्तत्कालिकत्वेन फलमुखत्वपाकजैघत्वात्तु एवमेतादृशरीत्या चित्रस्पर्शादिकमपि आत्मत्वामप
प.ग.२० १९ दृष्टीपिदृष्टानीति अत्वमधिकं चित्ररूपविचारोऽनुसंधेयमिति सन्क्षेपः। स्पर्शोऽपि चेति। सुकुमारकठिनस्पर्शविद्व
पारक्षेऽवयविनीत्यादिः। ननु व्याप्यवृत्तेरूपस्य स्वीकृतत्वात् किमितिनांगीकृतोऽयं तेषामाह। अन्यथेति। अत्र व्या
प्यवृत्तिनानास्पर्शांगीकारे इत्यर्थः। सुकुमारावच्छेदेनेत्यादिः। ननु व्याप्यवृत्तिस्पर्शांगीकारेऽप्येष इतिवासंसामा
न्यतोऽव्याप्यवृत्तिस्पार्शनित्वावच्छिन्नंप्रतिस्वावच्छेदकावच्छेद्यत्वसंबंधनेत्वकू संयोगस्य हेतुत्वकल्पनात्। नच
व्याप्यवृत्तित्ववादिनापि कठिनस्पर्शादिस्पार्शनित्वावच्छिन्नं प्रतिकठिनस्पर्शादिमद्द्रव्यावच्छिन्नत्वकू संयुक्तस
मवायत्वेन हेतुत्वकल्पनान्नानुपपत्तिरितिवाच्यम्। तथा सति गौरवप्रसंगादिति भावः। ननु सर्वमिदं सुकुमा
रकठिनभेदेन यत्पिव्यापर्णं तद्विशेषतदेवतुल्यं सुकुमारत्वकठिनत्वादेः संयोगवृत्तिजातित्वादित्याशंकां निषे
धति। नचेति। संयोगविशेषावित्यारंभकसंयोगवृत्तिजातिविशेषावित्यर्थः। रसोऽपि चेति। तिक्तमधुरादिना
नावयवावच्छेदघटादावित्यादिः। तत्राव्याप्यवृत्तिरसांगीकारे बाधकमप्याह। अन्यथेति। अर्थस्तु पूर्ववत्। ननु नाना रस० १९
जातीयरसवद्द्रव्यावयवारब्धे घटे अव्याप्यवृत्तिनानारसांगीकारो निरर्थकः। नचैतत्तत्र तथास्तु पाकेरससमाहाराकारा

नुपपत्तिः चित्ररसादिस्वीकारस्य गौरवदोषग्रासेन नीरसत्वस्यैव पर्यवसानादिति वाच्यं तत्रावयवगतरसमादा
यानुपपत्तेः। न च परमाणुकपर्यन्तं नीरसाः सन्त्वकारणगुणादिति वाच्यम्। तत्र सांशे उपनीतभानात् न कपरमाणु
गतरसविषयकप्रत्यक्षस्यैवांगीकारादिति मनसि कृत्वाह। नीरसस्यैवेति। तन्त्रेति १ नानारसवद्द्व्यवयवारब्धेऽव
यविनीत्यर्थः। ननु तत्र रसोऽस्तीत्येवाबाधकाभावेऽवयवरसरूपकारणासत्त्वादिति चेत् रसत्वावच्छिन्नं प्रति स्वसामाना
धिकरण्यविशिष्टस्वविजातीयरससामानाधिकरण्यसंबंधेन रसत्वेन प्रतिबंधकत्वकल्पनादिति भावः। इदं त्वा
ननः तत्र चित्ररसस्वीकारे पुनरुक्तत्वादिति ध्येयम्। एतेनेति २ इति निरूपितेनेत्यर्थः। गंधोत्पादनादिति। ना
नाजातीयगंधवद्द्व्यवयवारब्धेऽवयविनि व्याप्यवृत्तित्वेन गंधोत्पादनादित्यर्थः। इदमुपलक्षणं। तत्रावयविनि
धोवेत्यपि द्रष्टव्यं मधिलनीति प्रसंगादिति। तथा च कर्मणोऽव्याप्यवृत्तित्वास्वीकारे तत्र तथाविधप्रतीत्यनुप
पत्त्या तदव्याप्यवृत्तित्वांगीकार आवश्यक इति भावः। ननु तत्र शाखायामेव परं चलतीति न तु वृक्ष इति बाधकप्रतीतिस
त्वाच्चलतीति प्रत्ययोऽप्रमैवेत्यभिप्रेत्याशंकते। शाखायामेवेति। यथेति बाधक इति शेषः। न स्यादेवेति। शाखायामेवे
त्यादिनादर्शितप्रत्ययस्येत्यर्थः। सर्वविच्छेदेनेति। सर्वावयवावच्छेदेनेत्यर्थः। सर्वथैवेति। सर्वावयवानामवच्छे

प॰टी॰र॰ २० देकत्वावगाहनं यिनैवेत्यर्थः । उक्तप्रमापयविरोधादिति तथाविधमूर्त्ते चलतीति प्रत्ययस्य प्रतिबंधकसत्वादित्यर्थः
तथाचतयोः परस्परविरोधेनाप्रामाण्यापत्त्याविषयव्यवस्थयाप्रामाण्याभ्युपगमस्यावश्यकत्वादितिभावः । अतएवे
ति । कर्मणोऽव्याप्यवृत्तित्वादेवेत्यर्थः । ननु भवतु उपदर्शितरीत्या कर्मणोऽव्याप्यवृत्तित्वं । रूपादेरव्याप्यवृत्तित्वेन
प्रतिकूलतर्कस्यसत्वाद्द्वयमेव । तथाहि । नानारूपवदवयवावच्छेदेन घटे अव्याप्यवृत्तित्वे नानारूपवत्त्वे नीलाद्यवयवा
वच्छेदेन घटे स्वस्वावच्छेदेन नानानीलोत्पादप्रसंगात् अवच्छेदकतासंबंधेन नीलजनकस्य नीलस्य सर्वावयवाव
च्छेदेन सत्वादित्यत आह । सर्वैरेवेति । स्वस्वावच्छेदेनोत्पन्नेनाव्याप्यवृत्तेरेकच्छेदकत्वमंगीक्रियत इति ध्वनितं तत
था च तत्र लाघवादेकमेव नीलमंगीक्रियत इति भावः । अवयव्येकत्वप्रत्ययबलेनैकत्वहेतुतारयति । एकत्वं चे
ति । एकत्वमित्युपलक्षणं द्वित्वादिकमपि तत्समवायिकारणानामित्युपलक्षणम् । न च द्वित्वादिके अपेक्षैकत्वबुद्धिरूपा
देः समवायिकारणाभावे घटद्वयएव द्वित्वमुत्पद्यते न त्रिषु तत्र नियामकाभाव इति वाच्यम् । तत्र समवा
यिकारणद्वयस्यैव विशेषतो नियामकत्वसंभवात् । न च तत्र समवायिकारणद्वयस्य विशेषतो हेतुत्वक
ल्पनेन नैकत्वद्वयहेतुताकल्पनमनायासविनिगमनाविरह इति वाच्यं तत्तत्समवायिकारणासमवेतरूपादिना राम॰ २०

व्यक्तिस्थानीयपत्तिवारणाय यत्तत्र व्यक्तिसमवेतं प्रति तत्तद्व्यक्तित्वेन हेतुत्वकल्पनया प्रागभावप्रतियोगित्वस्यैवाविनिग
मकत्वादिति भावः । असमवायीकारणत्वेनेति । आत्माश्रयदोषादिति दोषः । ननु मास्तु तेन रूपेण कारणत्वं
तथापि भावकार्यस्यासमवायिकारणजन्यत्वनियमेनावयव्येकत्वं प्रति स्वाश्रयसमवेतत्वसंबंधेनावय
वैकत्वादिना समवायिकारणत्वमावश्यकमित्यत आह । भावकार्यस्येति । तथा चाप्रयोजकत्वादुपेक्षितनि
यमोऽपेक्षणीय इति भावः । द्रव्यनाशं प्रत्यसमवायीकारणनाशस्यैव कारणत्वे ननु समवायिकारणनाश इति व्यु
त्पादयति द्रव्यनाश इति । असमवायिकारणनाशस्यैवेत्येवकारेण समवायिकारणनाशस्य हेतुत्वव्यवच्छेदः । ने
नु विनिगमनाविरहात्समवायिकारणनाशस्यापि तत्र हेतुत्वमावश्यकमित्यत आह नित्यसमवेतेत्यादिना
च्यावयवनाशजन्यनाशानुरोधेन द्रव्यनाशं प्रत्यसमवायिकारणनाशस्य हेतुतायां प्रागभावप्रतियोगित्वस्यैवाविनिगम
कत्वादिति भावः । अत्र प्राचीनानुयायिनः स्वातंत्र्येणापि द्रव्यनाशं प्रति समवायिकारणनाशस्य हेतुताकल्प
नेनेदं चैव प्राचीनमते नावकाशः । न हि केनापि तु कपालादिसमवेतनाशानुरोधेनावश्यकं कपालसमवेता
नाशं प्रति कपालादिनाशस्य हेतुतापेक्षोपपत्तेः । तथाहि कपालादिनाशस्य कार्यतावच्छेदकं न तु द्रव्यनाशत्वा

प.दी.र. २१ दिकं गौरवात् किंतु कपालसमवेतनाशत्वं घटनाशसाधारणमिति कपालनाशाद्घटनाशोऽन्यत्रतु बाधकाभावात्
अत एव कपालादिनाशकारणतावच्छेदकं न कपालादिसमवेतनाशत्वं अग्निसंयोगान्न्यूनकपालादिसमवेतरूपादि
नाशे व्यभिचारात् नाप्यग्निसंयोगजन्यकपालादिसमवेतनाशत्वं तथा उत्तरसंयोगजन्यकपालादिक्रियाना
शे व्यभिचारात् उत्तरत्वस्य दुर्वचत्वात् मूर्तत्वस्य तत्र निवेशासंभवात् संयोगत्वेनानुगतीकृतयोरुत्तरसंयोगा
ग्निसंयोगयोर्जन्यत्वनिवेशात्तद्रूपत्वाहतेः । कालोपाधिविधया संयोगादिजन्यस्य कपालादिनाशजन्यकपा
लादिसमवेतनाशस्यासत्त्वात्प्रसंगात् पाचकाप्रनापत्या तत्तद्रूपादिनाशं प्रति कपालादिनाशत्वेन हेतुता क
ल्पनीया तथा च समवायिकारणनाशाद्व्यनाशासंभवे हेतुरीश्वरेच्छा न तु विनष्टकार्यकारणभावकल्पनं इति चे
न्न स्वप्रतियोगिसमवेतत्वकालिकविशेषणतान्यतरोभयसंबंधेन नाशवानुपलक्षितप्रतियोगितासंबंधे
न नाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवेतत्वसंबंधेन कपालनाशादिनाशत्वेन हेतुतापाकं मन्वानानां तत्रैव तात्पर्य
दर्शितं तन्नुपपत्तिः । पाकादिजन्यरूपादिनाशस्य तथाविधप्रतियोगितासंबंधेनानुत्पत्तेस्तथा च तत्र ध्वंसं प्रति स
मवायिकारणनाशस्य हेतुत्वमते समवायिकारणनाशजन्यद्रव्यनाशे व्यभिचारवारणाय समवायिकारणनाशा राम॰ २१

जन्यत्वस्यासमवायिकारणनाशजन्यतावच्छेदककोटौ निवेशे गौरवात्सूत्रे असमवायिकारणनाशादेव द्र
व्यनाशं इत्याहुः तन्न सत् । कपालनाशजन्यारंभकसंयोगनाशोत्पत्तिकाले घटादेरुत्पत्तिकारणसत्त्वेन तथा
विधप्रतियोगितासंबंधेन नाशत्वावच्छिन्नस्यापत्तिवारणाय तथाविधप्रतियोगितासंबंधेन द्रव्यान्यनाशत्वा
वच्छिन्नं प्रति द्रव्यत्वेनापि हेतुत्वस्याधिकस्य कल्पनीयत्वात् तत्र समस्तहेतुकारित्वस्य कल्पनीयतया तत्तुल्यत्वा
त् । तस्माद्द्रव्यतादात्म्यसमवायिकारणनाशस्यापि हेतुतावच्छेदकीतिरहस्यं चक्षुःसंयोगादिरूपकारणाव
नाशनाशादेः प्रत्यक्षवारणाय बहिरिन्द्रियजन्यसत्त्वावच्छिन्नं प्रत्युद्भूतरूपत्वेन हेतुतां कल्पयित्वा प्राचोक्तये
रमत्य स्पर्शत्वमंशे कुर्वन्ति तन्न नन्दुष्यति द्रव्यस्पार्शनि इत्यादि स्पर्शविषयमेवेत्येवकारेणार्थवच्छेदः प्रयोजक
अन्तरेण द्रव्यस्पार्शनप्रतिस्पर्शस्य हेतुत्वादेवेत्यर्थेन तु द्रव्यस्पार्शनं प्रति स्पर्शस्य हेतुत्वे तु त्रुटेः स्पार्श
नापत्तिरित्यत आह । त्रुटेरस्यापानत्वेविलक्षितितुकारेणात्र त्रुटेः स्पार्शनाभ्युपगमे क्षत्यभावः सूचितः प्रत्य
क्षमपरिमाणमिति । अपरेणामहत्त्वमाह उत्तरात्पर्यमहत्त्वसाधारणजात्यवच्छिन्नमित्यर्थः तादृशजाति
सिद्धिश्च स्पार्शनजनकतावच्छेदकतया तत्प्रतिभावः स्पार्शनजनकतावच्छेदककोटौ रूपनिवेशे बाधकमाह गौरवा

प॰ री॰ र॰ २२ त्यादिना। प्रामाणिकं गौरवं न दोषायेत्याहुः तन्नाभावादिति। प्रत्येकं स्पार्शनजनकतावच्छेदककोटिप्रविष्ट इत्यर्थः। द्रव्यस्पा
र्शनप्रतिस्पर्शहेतुतावच्छेदकत्वाप्य द्रव्यचाक्षुषे तस्य हेतुतावच्छेदकत्वापत्तिः। चाक्षुषद्रव्यप्रत्यक्षे त्विन्द्रियादिनान्यथे
ति। कारणमित्यर्थः। द्रव्यचाक्षुषजनकतावच्छेदककोटौ स्पर्शनिवेशे बाधकमाह। गौरवादित्यादिनान्यथेति। कार
णमित्यर्थः। अयमाशयः। त्वगिन्द्रियप्रत्यक्षत्वावच्छिन्नं प्रति स्पर्शस्य हेतुत्वं न संभवति वह्निस्पर्शवत्त्वात्। न वा
त्वगिन्द्रियमेव वह्निवृत्तापि मानसान्यद्रव्यप्रत्यक्षत्वमात्रापकार्यतावच्छेदकविनिगमनाविरहसंभवात्। न च त्व
ग्वान्तरप्रत्यक्षत्वमेव रूपजन्यतावच्छेदकं मनस्त्वायोः प्रत्यक्षस्यासंदेहेन मूर्तप्रत्यक्षत्वस्य संदिग्धव्यभिचार
कत्वात् स्पर्शकार्यतावच्छेदकत्वासंभवात्। अपि च मूर्तप्रत्यक्षत्वावच्छिन्नं प्रति रूपस्य हेतुतामभ्युपेत्य वायोः प्रत्यक्षस
त्वानंगीकारे वायोः स्पर्शस्पार्शनानुपपत्तिः। घटगगनसंयोगस्पार्शनवारणाय कूलस्य विजातीयसंस्पार्शन
त्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबंधावच्छिन्नप्रतियोगिताकस्पार्शनविषयत्वाभावाभावरूपहेतोरभावात्
मचस्पार्शनविषयत्वाभावाभावकार्यतावच्छेदककोटौ विजातीयसंनिकर्षस्य प्रविष्टत्वमपि निवेश्यमिति वाच्यम्।
विनिगमनाविरहेण कार्यकारणभावानन्त्यात्। कार्यतावच्छेदकगौरवाच्च स्पार्शनविषयत्वाभावाभावसहहे राम॰ २२

न सामान्यसामग्र्याः स्पर्शस्पार्शनस्थले प्रसिद्धायाः गगनघटसंयोगादिप्रत्यक्षापत्तेर्दुर्वारत्वाच्च न च चरमदोष
वारणाय स्पर्शस्य स्पार्शनत्वावच्छिन्नं प्रति स्पर्शत्वेनापि हेतुत्वं कल्पनीयमिति वाच्यमुक्तादृशकार्यकारणा
भावकल्पनस्यापि नैयायिकमते अधिकगौरवसंयोगत्वादिना हि कं बहुं नरणमहनीयं वायुप्रत्यक्षतावादे इति
न चैवमपि बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वावच्छिन्ने किं नियामकं तत्राह द्रव्यस्येत्यादि । न वाकारणा । न वाद्रव्य
प्रत्यक्षत्वावच्छिन्नं प्रति अनात्मसमवेतशब्दरसगंधजातीतरयोग्यधर्मसमवायित्वं कारणं । सति सप्तम्यर्थः ।
अत्रात्मनिरासायेतरज्ञानादिरूपयोग्यधर्मसमवायित्वसत्त्वाद्बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वावच्छिन्नापत्तिवा
रणायानात्मसमवेतत्वं धर्मविशेषणं । आकाशमादाय च शब्दरूपतादृशधर्मसत्त्वात्तद्धर्मावच्छिन्नापत्तिवारणाय
शब्देतरत्वस्य निवेशः । वाय्वानीतजलीयभागं चं यवकुभागयोः रसगंधरूपतादृशयोग्यधर्मसत्त्वात्तत्रापि तद्
धर्मावच्छिन्नापत्तिवारणाय रसगंधेतरेति द्रव्यत्वादिजातिरूपतादृशधर्मसमवायित्वमादाय गगनादौ तादृशध
र्मावच्छिन्नापत्तिवारणाय जातीतरेति । एतानि सर्वाणि विशेषणानि नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावनि
यम इति व्याप्त्यंगीकारे सार्थकानि न तदनंगीकारे तु न तादृशविशेषणसामग्र्यभावं देहात्मादौ बहिरिन्द्रियजन्यद्रव्यप्रत्यक्ष

प.ना.र.
२६

त्वावच्छिन्नस्याप्रसिद्ध्या रतासंभवात्तादृश्या विशेषणताया अनुपादेयानीति हृदयम्। अत्र कारणतावच्छेदकत्वे कार्ये योग्यपात्र
विशेषणतास्य व्याप्तिमाह: सुखादीति। तथा च मनस्त्वजातिस्पर्शावच्छिन्नभिन्नत्र समवेतस्वार्थकिनात्मसमवेतत्वरूपविशे
षणाघटितोपदर्शितकारणतावच्छेदकस्यातानादिकमादाय स्वरूपसम्बन्धेन सत्त्वात्तत्राऽदृष्टाधर्मावच्छिन्नापत्तिकारणा
यधर्मविशेषत्वविशेषणमिति भाव: आत्मात्मसमवेतेत्यत्र विषयपि धर्मसमानाधिकरणाविवक्षायां तु योग्यत्वस्पर्द
र्शितत्वाद्व्याप्तिर्न संगच्छते। तत्रात्मान्तरमादाय पित्राचादिसंयोगेति। तथा च पित्राचादिसंयोगस्य पत्नादृष्टधर्मसम
वायित्ववत्तात् पित्राचादेरतद्धर्मावच्छिन्नापत्तिकारणयोग्यत्वे तद्धर्मविशेषित इति भाव: विषयपि धर्मसमानाधि
करणेति विषयपि धर्मसमानाधिकरणत्वावच्छिन्नप्रतियोगिताकभेदस्य तच्छक्तित्वेन तिवक्षानां तु तिस्पर्थ: ज्ञानतो
ज्ञानादिसमानाधिकरणत्वावच्छिन्नप्रतियोगिताकभेदमादाय व्याप्तिगमनाविरह: तथाविधभेदस्येतादृशाभे
दस्य नियततया ऐक्येन तच्छक्तिनेकतिवेशाननैव सर्वनिवेशासंभवान्नु इति ध्येयम्। पादोन्नोपादेयइति। अ
कादाश्येच्छरादृतिमिरिजत्वेन पारदृस्य विषयपित्रानादिसमानाधिकरणतया पादावृत्ते। छिन्नत्वाभावेन गगने गम०
नथाविधधर्मसमवायित्वाभावात्तत्रापत्ति: सम्भवतीति भाव:॥ वह्निरिछिपजन्यइच्छाममस्वात्मावच्छिन्नं प्रति

२६

अनात्मसमवेतेत्यादि विशेषणाविशिष्टधर्मसमवायित्वस्याहेतुत्वे गौरवाज्जन्यमहापतत्रलघुकारणांत
रमाह॥ अस्मदादीत्यादि॥ अस्मदादेः जीवात्मनः नयनसंसृष्टपित्तद्रव्यस्य चेत्यर्थः॥ परिमाणाश्रयेत्या
दि॥ इदं तु यथाऽनिर्दिशात्रममन्वेति॥ तथा च जीवस्य परिमाणाश्रयत्वमतेन यत्नसंसृष्टपित्तद्रव्यस्य परिमा
णवत्वमतेऽविति समुदायार्थः॥ इदमुपलक्षणं॥ वाष्पानीतत्वं पक्षभागादेरपि परिमाणानंगीकारेऽस्यापि
वोध्यम्॥ तादृशाश्रयस्य॥ वहिरिंद्रियजन्यद्रव्यप्रत्यक्षेतत्याकारणं॥ ननु नयनगतपित्तद्रव्ये परिमाणव
त्वे प्रमाणाभावस्तत्र तदनुपलंभात् अनुमानस्याप्रयोजकत्वात् प्रमाणांतरस्य चाभावात् तथा च तद्दर्शि
तप्रत्यक्षे परिमाणस्य हेतुत्वे नयनसंसृष्टपित्तद्रव्यप्रत्यक्षस्यानुपपत्तिरित्यतः इत्याशयात्कल्पांतरमाह॥ यद्वे
ति॥ नीरूपमेवेति॥ तथा च तत्र परिमाणानंगीकारेण क्षतिः॥ रूपस्य रूपविशेषकारणाभावात्तस्याप्रत्यक्ष
त्वेनोपदर्शितकार्यकारणभावे व्यभिचाराभावादिति भावः॥ अथ यथा तथा विधपित्तद्रव्यस्य रूपस्वीकारे इत्य
र्थः॥ ननु नयनसंसृष्टपित्तद्रव्ये रूपानंगीकारे कथं शंखः पीत इत्यारोपः॥ तत्र नयनसंसृष्टपित्तद्रव्यरूप
स्येवानुमेयमानस्य शंखवृत्तौ आरोप इत्यादि प्रतत्राह॥ स्वपरिमाणस्त्विति॥ स्वपरिमाणं नयनासंसृष्टद्रव्यादि

प.रा.र: दूषितमित्यर्थः ॥ शंखादावारोप्यत इति। तथा च नयनगतपित्तद्रव्यस्य पीतस्यानुभूयमानस्य शंखादावारोपायानु
२५ पगमाद्दोष इति भावः। द्रव्यप्रत्यक्षत्वावच्छिन्ने अनुगतनियामकमाह ॥ द्रव्यप्रत्यक्षेत्यादि ॥ तथा कारणत्वं न
मुरसेतरत्वस्योपदर्शितकारणतावच्छेदककोटौ निवेशे रसनगतपित्तद्रव्यप्रत्यक्षे व्यभिचारस्तत्र त्वाविध
योगधर्मसमवायित्वाभावादत आह ॥ रसनगतं चेत्यादि ॥ तद्रूपवद्विषयेन न चाक्षुषप्रत्यक्षनिरासः ॥ तत्स्पर्श
वद्विषयेनैतस्य स्पार्शनप्रत्यक्षस्याभावात्त्रोपदर्शितकार्यकारणभावेन निरासः। रसनाचेन इत्यग्राहिकेत्यनेन रा
सनप्रत्यक्षस्य निरासः ॥ तथा च रसनगतपित्तद्रव्यस्य प्रत्यक्षस्याभावात्त्रोपदर्शितकार्यकारणभावे व्यभिचार इति
भावः ॥ एतेनेति ॥ वाघानीतत्वं कभागगाहैरित्यादि सम्भवे प्रमाणाभावेन प्रत्यक्षस्यानभ्युपगमेनेत्यर्थः ॥ वाघा
नीतत्वं पकभागाधीनि ॥ वाघानीतत्वं पकभागव्यभिचारोऽधीनार्थः। व्याख्यानतः प्रत्युक्त इत्यर्थः ॥ वह्निरित्यादि यत्र
त्य द्रव्यप्रत्यक्षस्योद्देकारणकथनेनेत्यभोद्धाउको ॥ वस्तुतस्तस्याभावेऽपि क्षतिविरहः ॥ गगनादेः प्रत्यक्षस्य वारणं
तुल्यादेव वाह्य रूपत्वमेन द्रव्यलौकिकस्पार्शनत्वावच्छिन्ने प्रतिस्पर्शहेतुत्वेन द्रव्यचाक्षुषं प्रति रूपहेतुत्वेन राम०
संपादनीयमित्यर्थः ॥ घटत्वाद्यभावस्य लौकिकप्रत्यक्षस्याभावमुपपादयति ॥ घटत्वादेरभावस्येत्यादि २५

नातस्य घटत्वत्वस्य अतींद्रियत्वादिति ॥ घटेतरावृत्तित्वे सति घटवृत्त्यन्योन्याभावप्रतियोगीगितानवच्छेदक
त्वरूपतयाऽतींद्रियकात्तादिघटितत्वादित्यर्थः ॥ तथा चातींद्रियधर्मावच्छिन्नप्रतियोगिताकाभावस्य लौकि
कप्रत्यक्षाभावेन न घटत्वत्वावच्छिन्नप्रतियोगिताकाभावस्य लौकिकप्रत्यक्षमिति भावः ॥ एवमिति ॥ अती
न्द्रियघटितधर्मावच्छिन्नप्र- तियोगिताकाभावस्य लौकिकप्रत्यक्षाभावेनेत्यर्थः ॥ जातित्वरूपेणेति ॥ जा
तित्वस्य नित्यानेकसमवेतत्वरूपतयाऽतींद्रियध्वंसादिघटितनित्यत्वघटितत्वेनातींद्रियत्वादिति भा
वः ॥ अत्र तु तत्र घटितत्वेन घटत्वाद्यभावलौकिकप्रत्यक्षस्य वारणं तु सुधीभिर्विभाव्यम् ॥ न च घटत्वत्वं जातिरिति
घटत्वादिनातात्पर्यस्वरूपं वैत्यम्पदेनतनु ॥ सत्तायां जातित्वं निराकरोति ॥ सत्तायामिति ॥ ननु द्रव्यगुणकर्मसु
प्रत्यक्षसिद्धा सत्ताजातिः कथमपलप्यतेऽत आह द्रव्यगुणेत्यादि । धर्मवृत्तित्वमिति ॥ आदिना गगनादि
परमाणुरूपक्षित्यादिपरिग्रहः ॥ ननु सदिति व्यवहारबलात् सत्ताजातिरायास्यतीत्यत आह ॥ जात्यादावपी
ति ॥ तथा च सद्व्यवहारस्य सत्ताजातिविषयत्वे जात्यादावपि सद्व्यवहारो न स्यात् अतो भावत्वादिकमेव तद्व्यव
हारविषय इति न व्यवहारेण सत्ताजातिसिद्धिरिति भावः ॥ ननु घटः सन्निति व्यवहारस्यान्यथानुपपत्त्या सि

द्वायां सत्ताजातौ ज्ञात्वाहि सद्व्यवहारस्यैककार्यसमवायसंबंधेन सत्ताजातिरेव विषयो न भावत्वादिकमि
प॰टी॰रा॰ २५ त्यत आह ॥ घटादाविति ॥ तथा च घटः सन्नित्यादिव्यवहारस्यापि वर्त्तमानत्वादिनैवोपपत्तौ न तद्यथानुपप
त्त्या सत्ताजातिसिद्धिरिति भावः ॥ न च वर्त्तमानत्वादेरननुगततया अनुगतसद्व्यवहारो विना सत्ताजातिम
निर्वहतीति वाच्यम् ॥ अनुगतव्यवहारानभ्युपगमादिति ॥ ननु सद्व्यवहारावच्छेदकतया सत्ताजाति
[illegible]त्यत उपसंहारव्याजेन तामाशंकां निराकरोति ॥ किंचिति ॥ तद्धीति ॥ सत्तास्वरूपमित्यर्थः ॥
तथा च सद्व्यवहारावच्छेदकमपि भावत्वमेव न तु सत्ताख्या जातिरिति ॥ जातिस्वरूपमित्यर्थः । अत्र व
र्त्तमानत्वादिकं अननुगतत्वादुपेक्षितमिति ध्येयम् ॥ ननु भावत्वस्यापि सर्वसाधारण्येनानुगतस्याभावा
त्कथं सद्व्यवहारावच्छेदकमित्यत आह तद्धीति ॥ भावत्वं चेत्यर्थः ॥ ननु भावत्वमेकाखंडोपाधिस्तर्हि
भावत्वमेव भावत्वमित्येव किं न स्यादित्यत आह ॥ भावत्वमेवेति ॥ एवकारोऽप्यर्थः ॥ तथा च विनिगमनाविर
हादुभयोरेवाखंडोपाधित्वं ॥ अत्र केचित् ॥ जन्यसत्त्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुतया द्रव्यजन्यतावच्छेदकको राम॰
टिप्रविष्टतया सत्ताजातिसिद्धिः ॥ न च तादृशकार्यकारणभावे मानाभाव इति वाच्यम् ॥ नीलादेस्त्वाप्यसम २५

वेनान्वसंबंधेननीलत्वरूपकारणसत्वासमवायेननीलादिपद्मिवारणायतादृशकार्यकारणभावस्यावश्यकत्वा
त्॥नवसमवायसंबंधेननीलादिकंप्रति स्वाश्रयसमवेतत्वविशिष्टद्रव्यत्वसंबंधेननीलादेर्हेतुत्वमस्य
नात्रतथाविधकार्यकारणभावांतरकल्पनमितिवाच्यम्॥स्वाश्रयसमवेतत्वद्रव्ययोर्विशेष्यविशेषणभा
वेविनिगमनाविरहेणकार्यकारणभावद्वयकल्पनेकारणतावच्छेदकसंबंधगौरवेणचातिरिक्तोपदर्शित
कार्यकारणभावकल्पनस्यैवोचितत्वात्॥उपदर्शितकार्यतावच्छेदककोटौजन्यत्वनिवेशफलंतु॥जन्यत्वस्य
कालिकसंबंधेनघटत्वादिमत्वरूपस्यापिवक्तुंशक्यत्वान्नदूषितुमशक्यनीयम्॥यतोत्रकालिकसंबंधेन
घटत्वादिमत्वरूपतज्जन्यत्वस्यनिवेशेनस्यमतेकालसाधारणप्रसक्तेकार्यतावच्छेदकस्यनित्यसाधारणत्व
मायातीतिनिरस्तंसप्रतियोगित्वरूपस्यागभावप्रतियोगित्वरूपंवाजन्यत्वमत्रनिवेशनीयम्॥वस्तुतस्तु॥नि
त्यवृत्तिधर्मस्यापिकार्यतावच्छेदकत्वांगीकारेणसत्वमात्रस्यैवद्रव्यकार्यतावच्छेदकत्वेनयाजन्यत्वस्यतत्र
निवेशएवनास्तिकिंचिद्विनिगमनाविरहेणतस्यनानाविधत्वप्रयोगौरवंवा।तस्मिंनतएवसमवायसंबंधेन
जन्यत्वमेवकार्यतावच्छेदकमस्तु।किंतत्रसत्तायानिवेशनेनेतिनोपदर्शितनियुक्तिः।सत्ताजातिसाधिकेमपिति

प॰ टी॰ र॰ २६

रस्त्वे॥ जन्यत्वस्य गुरुत्वेनयात इत्यहापक्षत्वात्तापाएव तत्रान्निवेशनौचित्यात्॥ यदि च जन्यत्वमखण्डोपाधिः तथापि
जन्यमात्रवृत्तिमिदं व्याप्तेः स्तूयमानत्वेन तत्त्वानमात्रव्यापकविशेषणाविरहेण सत्तायाएव तत्र च त्वत्तोचित्यात्॥ न च स
त्तायास्तत्वात्वेपि तत्त्वावृद्धिधर्मैहादिकमादायविनिगमनाविरह इति वाच्यम्॥ सत्ताया धर्मिग्राहकमानसिद्ध
त्वादित्याहि कं सत्ताजातिविचारे अनुधेयमिति। गुणत्वजातिं खंडयति॥ एवमिति १ व हुसमाराणु मो मत्पर्थः॥
रूपयगुणवृत्तिमेव स्पष्टमाह सपति॥ अतीन्द्रियेष्विति॥ अतीन्द्रियरूपादिष्वित्यर्थः मात्रपदं योगादिति॥ इदमु
पलक्षणं॥ अनुमानस्याप्रयोजकत्वादित्यपि द्रष्टव्यम्॥ ननु रूपादिषु अनुगतगुणत्वव्यवहारबलादेव गुणत्व
जातिः सेत्स्यतीत्यत आह॥ तु रणादेरित्यादि॥ तत्त्वान्वयव्यानुरणादेर्गतानि वैजात्यमादाय गुणत्वव्यवहारस्त
स्य रूपादिष्वपि उत्कर्षादिकमादाय गुणत्वव्यवहारोपपत्तौ न तु विशिष्टिगुणासाधारणानुगतगुणत्वजातौ प्र
माणाभाव इति भावः। द्रव्यकर्मान्यसामान्यवद्वृत्तिकारणतावच्छेदकानुगतिर्हि तानां रूपादिकारणतानामवच्छे
दकतया गुणत्वजाति रपास्यतित्यावापीअनुमम्येनेतन्मतेहेषयतीत्येकस्येति॰ अनुगमस्येत्यर्थ ४ पे
न केनापिरूपेणेति द्रव्यकर्मान्यसामान्यवद्वृत्तित्वेनेत्यर्थः अनुगमयतीति॥ नद्रव्यच्छेदकत्वेनेति शेषः॥ अ

गम॰ २६

तिप्रसंगादिति ॥ रूपद्रव्यत्वकर्मत्वसामान्यवत्त्वे नित्यत्वेनानुगतीकृतानां कारणतानां अवच्छेदकत्वेन रूपवत्त्व
मत्त्वयोर्विग्रहानि गुणत्वन्निज जातेरपि सिद्धिप्रसंगादित्यर्थः ॥ अत्र छायाप्रतीतौ दूषणान्तरमाह । जातिसंकरेति तु
ल्यपुनस्कारपदद्रव्यत्वसामान्यवद्वृत्तिकारणतावच्छेदकत्वेन रसवद्वृत्तियोर्विशतिगुणकर्मसाधारणजातिसिद्धौ
संकरप्रसंगादित्यर्थः ॥ इदमत्रबोध्यम् ॥ असति बाधके गुणत्वपदशक्यतावच्छेदकत्वेन गुणत्वजातिसिद्धौ
बाधकाभावः ॥ न तथा सति विभुपदशक्यतावच्छेदकत्वेन विभुत्वतुल्यपरिमाणवत्त्वजातिसिद्धौ बाधकाभावः ॥
न तथा सति विभुपदशक्यता सिद्धिप्रसंग इति शिरोमणियुक्तं दूषणं पुष्कलम् । इदानीं ईश्वरजीवातिरिक्तस्य विभुत्वे
मानाभावेन विभुत्वस्यात्मत्वतुल्यवृत्तितया आत्मत्वातिरिक्तजातित्वे तुल्यव्यक्तिवृत्तित्वबाधकसत्त्वेन त्वादि
मानवत्काशानां ॥ आकाशादीनां मतिरिक्तत्वपक्षेऽपि तथा स्वीकारे बाधकाभावाच्चेति ॥ इदं प्राचीनपरमात्मनई
त्पत्तेः ईश्वरे आत्मपदव्यपदेशं कुर्वतो दीधितिकृतोऽपि संमतं ॥ अनुगतात्मपदशक्यतावच्छेदकतो विनाईश्व
रे आत्मपदव्यपदेशं कुर्वतो दीधितिकृतोऽपि संमतं ॥ अन्यथा आत्मत्व रसाधारणात्मत्वजातौ पुष्कलमनाभावेन तत्र
थाव्यपदेशोऽसंगत एव स्यादिति ॥ अनुभवच जुषप साधारणं अनुभवत्वजातिं प्राचीनसंमतां दृष्टवान् पितु

प.टी.र.
५८

माह यथाद्वाविहि ज्ञाने चेति स्मृत्यनुपपत्तानत्वनिबंधन इति एतेनानुभवस्य व्यवहारबलादनुभवत्वजातिरपास्यतेति
न्यपास्तम्॥ ननु न यापि अनुभवामीत्यनुव्यवसायबलादनुभवत्वजातिरपास्यतीत्यत आह॥ जातिस्विति सा
क्षात्कारित्वमेवेति॥ अयमाशयः॥ तथा च प्रत्यक्षत्वादिरिति तत्तानुभवत्वजातौ मानाभाव इति भावः॥ प्रत्यक्षा
त्वातिरिक्तानुभवत्वं तु षयपक्षे अनुभवस्य जातिस्वीकारे बाधकमप्याह॥ स्यपयिषेति॥ तथा च नानाहरजातिविप्र
षस्वीकारे सुखाद्यनुमित्यनन्तरमपि तत्तान्वनुव्यवसायापत्तिरिति भावः॥ केचित्तु गतिविशेषराज्ञानानां हि तत्पत्तावच्छे
दककोटिप्रविष्टत्वेनानुभवत्वजातिसिद्धिः॥ अन्यथा विशिष्टबुद्धित्वादेस्तथात्वे स्मृतौ व्यभिचारप्रसंग इत्याहुः॥
तदसत्॥ प्रत्यक्षत्वस्य तत्तानुमानत्वावच्छेदकत्वोपपत्तौ अतिरिक्तानुभवत्वस्य तत्र निवेशप्रयोजनाभावात्॥ न
च विशिष्टप्रत्यक्षत्वाद्यवच्छिन्नं प्रति विशेषणज्ञानानां हेतुत्वे विशेषणज्ञानानां हेतुविनानुमित्यात्मकविशिष्ट
बुद्ध्यापत्तिरिति वाच्यम्॥ अनुमित्यादिपूर्वं परामर्शादेरेव प्रयोजकत्वेन तथाविधकार्यापादनासंभवात्॥ न चैवं सति सा
ध्यविशेष्यकानुमितिविलोपप्रसंगः॥ इत्थमेव हि ज्ञानाभावदशायामपि परामर्शव्यापकीभूतज्ञानाभावप्रतियोगीय
त्वविशीलत्वतो पृथिवीत्वाकारकव्यतिरेकव्याप्यवगाहिपरामर्शसंभवेन तत्स्माद्दानीमपि साध्यविशेषणक

राम०
५८

नुमितेरपि संभवादिति वाच्यं ॥ तावता ज्ञानित्वविरहात् ॥ भवतु वा विशिष्टानुमितित्वावच्छिन्नं प्रत्यपि विशेषणा
ज्ञानादेर्हेतुत्वं न चैवं गौरवं बाधकाभावः ॥ नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वाभावेन प्रकृते न भवत्वेन तथा
संभवेन जन्यत्वनिवेशे कालिकसंबंधेन घटत्वादिमत्त्वमादाय विनिगमनाविरहेण नानाकार्यकारणभा
वव्याप्यान्तरूपेण ज्ञायात् तथाविधकार्यकारणभावद्वयस्यैव सम्यक्त्वात् ॥ न च प्रमाप्रमासाधारणज्ञानत्वावच्छेदक
त्वेपि सदोषस्तदवस्थ एवेति वाच्यम् ॥ ईश्वरप्रत्यक्षसाधारण्यात् अस्मदादिप्रत्यक्षासाधारणजातिविशेषस्या
भ्युपेयत्वे तस्यैव तथात्वोपगमात् ॥ अनुभवत्वमपि न यथा संभवतीति तु न मंतव्यम् ॥ तथा सति प्रत्यक्षत्वे
न संकरप्रसंगात् ॥ न चैवं अनुभवे प्रमेयत्वे वेति द्विधिते विरोधः ॥ पुंसो ॥ एतदर्थं तत्त्वमविवेकस्यापि विरो
धेनातिवारणीयत्वादिति निपुणतरमन्यत्रानुसंधेयम् ॥ इति संक्षेपः ॥ तदन्यताभावस्य तत्स्वरूपत्वम
भ्युपगच्छतां प्राचां मते दूषणमाह ॥ एवमिति ॥ वह्निमाराग्रपुत्कोमपर्यः ॥ अतिरिक्त एवेति ॥ घटाघ
तिरिक्त एवेत्यर्थः तद्भावो नास्तीति ॥ घटाभावो नास्तीत्यर्थः ॥ अभावत्वप्रत्ययादिति ॥ घटाभावाभा
वस्य घटादिस्वरूपत्वे अभावत्वेन तत्प्रत्ययानुपपत्तिः ॥ भावे अभावत्वाभावादिति भावः ॥ न च भावाभावसा

प॰टी॰२॰ ३८

तिरिक्तत्वासिद्धेः॥ न्यायवानाद्येऽभावमात्रस्यानतिरिक्तत्वसिद्धिप्रसंगात् तस्मादिदं कमविधेयम्॥ ननु घटाद्यभावा
भावस्यातिरिक्तत्वे तु लाघवात् अभावस्याप्यतिरिक्तत्वमुपगन्तव्यं॥ एवं च तदभावाभावस्यापीत्यनवस्थेत्याशं
कां निराकरोति॥ नचैवमिति॥ अभावाभाववत्तदभावादेरप्यतिरिक्तत्वमित्यर्थः॥ एकस्यैवेति॥ घटाभावस्यैकस्ये
त्यर्थः॥ स्वस्याभावाभावरूपत्वादिति॥ घटाभावघटाभावाभावाभावयोः स्वरूपत्वेऽस्मत्यर्थः॥ तथा च घटाभावाभावस्या
प्यभावो घटाभाव एव न त्वतिरिक्त इति नानवस्थेति भावः॥ भावत्वेऽसंसर्गाभावत्वं चेति॥ इदं चान्योन्याभावत्वाव
च्छिन्नस्यान्योन्याभावमवलम्ब्योक्तं॥ घटाद्यन्योन्याभावस्य तु अन्योन्याभावाभावत्वं॥ संसर्गाभावत्वं यदन्योन्याभा
वत्वं चेत्यपि बोध्यम्॥ केचित्तु॥ अन्योन्याभावस्याप्यन्योन्याभावोऽतिरिक्त एव॥ नचैवमनवस्थानस्याऽप्रा
माणिकत्वेनादोषत्वात्॥ अन्यथा अन्योन्याभावमात्रस्यैवातिरिक्तत्वविलोपप्रसंगात्॥ सर्वत्र तदधिकरणा
मात्रवृत्तिधर्म एव न त्वस्वरूपसम्बन्धेन संभवादित्याहुरिति वदन्ति॥ ध्वंसप्रागभावयोः प्रागभावध्वंसो ॰ त्रैति यो गौस्वरूपो
त्यन्यपरामृष्टो प्राचां मतेऽदृष्टमितुमाह॥ ध्वंसप्रागभावयोरित्यादि॥ नस्येति॥ यदृच्छेत्यर्थः॥ ध्वंसप्रागभावौ वा न
स्ता इति॥ ध्वंसो नास्ति प्रागभावो नास्तीत्यर्थः॥ यद्यपि तत्प्रत्यक्षनाभावविषयकत्वेनैतावत्यप्यनन्तरं ध्वंसप्रागभा

राम॰ ३८

वप्रागभावध्वंसयोरतिरिक्तत्वे साधकमिति विभाव्यते॥ तदा घटध्वंसो भविष्यति घटप्रागभावो नष्ट इत्यादिप्र
तीतिर्ध्वंसप्रागभावप्रागभावध्वंसयोरतिरिक्तत्वसाधिकेत्यवधेयम्॥ नचैवं सति अभावत्वमप्रत्यक्षमित्यादिगु
रुग्रंथविरोधः॥ तयोस्तत्प्रागभावत्वध्वंसत्वावगाहित्वादिति वाच्यम्॥ अभावत्वप्रत्यक्षत्वादिनास्य प्रागभा
वत्वध्वंसत्वावगाहिप्रत्ययादित्यपकृत्वात्॥ नयोर्भावाभावसाधारणातिरिक्तत्वे द्रव्याद्यखिलाभ्युपगमे तु ध्वं
सप्रागभावप्रागभावध्वंसयोरतिरिक्तत्वे लाघवस्यैव प्रकारस्तीकरणीयत्वादित्यवधेयम्॥ प्रागभावाभ्युपगम
एव ध्वंसप्रागभावप्रागभावध्वंसयोरतिरिक्तत्वानतिरिक्तत्वचिन्तासम्भवतीति प्रमाणाभावादित्यभिप्रे
त्याह॥ प्रागभाव एवेति॥ अयं च स्पनेनास्वरसः सूचितः॥ न हि जन्तुप्रागभावविचारे प्रागभावस्यातिरिक्त
त्वव्यवस्थापनावसरो ऽनुसंधेयम्॥ इह तु विस्तरभयान्न लिखितमिति॥ संस्कार एव हेतुरिति॥ इहत्या
ख्याता॥ तन्निष्ठलौकिकान्यविषयताशालित्वविशिष्टमतिं प्रति विषयत्वेनैव तानन्यत्वात् कारणत्वकल्पनेन तु
ज्ञानत्वावच्छिन्नं प्रति तत्त्वेन गौरवात्॥ एवं सति तत्प्रागादिसंस्कारस्य वैनियमतो विषयस्य तिकल्पनमपि नापेक्षि
॥ तत्पादित एव तत्प्रादिसासंस्कारो विषयभावनीयं पनेरिति॥ अविरोधादिति प्रत्यभिज्ञायाः संस्कारजन्य

प·दी·२·
२९

त्वविपिलप्याविधत्वापकृतायाक्षस्मृतेरित्यर्थः॥ प्रामाण्याभावादिति॥ इ प्राब्यासिग्यहेत्वनुकूलतर्काभावात्
इत्यर्थः॥ तथाश्वमहत्व प्रयोजकत्वमुस्पष्टंवयिवेनतत्पावत्कूमयाकानयाप्रत्यभिज्ञायाः संस्कारजन्यत्वेन किंचिद्विशि
ष्टकमितिभावः॥ प्राचीनमतेदूषयति॥ परेत्विति॥ अनुभूतौ॥ उद्बोधकासमवहितौ॥ अभिभूतेस्मृतिप्रतिबंध
कत्व॥ असमहितौ॥ तत्रास्मृतिरेवेति॥ एवंकारेणासंस्कारस्यप्रत्यभिज्ञाहेतुत्वमपव्छिद्य॥ अयमाशयः॥ तत्रिघलौ
किकाप्यविषयतायालिप्रत्यक्षत्वावच्छिन्नप्रमितिनिष्ठविषयकत्वेनस्मानत्वप्रत्यभिज्ञाहेतुत्वेघटपटादिगोचरानुद्बुद्ध
संस्कारदशायांघटादुपनीतभानमुसंगः॥ अनुद्बुद्धभिन्नतन्निष्ठविषयकत्वेनहेतुत्वेतुमहागौरवप्रसंगः॥ अतोल
घवात्तन्निष्ठविषयकज्ञानत्वेनैवतत्रहेतुत्वेकल्प्यते॥ तथाहेतुत्वकल्पनेचनियमतः प्रत्यभिज्ञाकृतिसाक्षात्कारपर्वन्ते
जाविषयकस्मृतिकल्पनस्यफलमुखत्वेनगौरवासं॥ बाधकत्वादित्यादिकमसमहृनीयम्॥ शब्दोनित्योनवेत्यादि
विप्रतिपत्तिवाक्यात्पः शब्दादिधर्मिताउपस्थितिः नित्यत्वनित्यत्वाभावकोटिद्वयोपस्थितिस्तु तदनंतरं विशेषधर्मा
समवसात्प्रतीतिसहकृतेभ्यः तदुपनायकज्ञानेभ्यः शब्दोनित्योनवेतिमानससंशयः॥ नमतत्रश्चगत्यमकसंयोजा राम०
यते॥ परोक्षज्ञानंनिश्चयात्मकमेवेतिसिद्धान्तविरोधात्॥ इत्थंचसंशयप्रयोजकंवाक्यंविप्रतिपत्तिवाक्यमिति २९

प्रांचः॥ तन्मतं दूषयति॥ यद्यन्येनाहि। न त्वाविध विप्रतिपत्तिर्वा कस्यचाद्यादिपदान् शब्दादिरूपधर्म्युपस्थितिः
न हूत्केवलं लिंग्यादि यद्यनन्यपदाभ्यां नित्यत्वनित्यत्वाभावादिरूपकोटिद्वयोपस्थितिः नद्धत्की भूतवाक्यान वि
रोधोपस्थितिस्तदनंतरं संशयापात्मक योग्यताज्ञानसहितात् ह्येनित्यो न वेत्यादिवाक्यात् अथ्य मतएव वृत्तानित्यो
न वेति शाब्दसंशय इति यद्यन्येसारस्य संशयइत्यतं यत्वार्थः ननु संशयपतद्व्याधिकरणान्तमित्वरूपविरोधान प्रकारः
स्तथासति तद्भावव्याप्यवज्ज्ञानान रूपसंशयप्रतिबंधकस्यकार्यकालेसत्वात् संशयस्य दुर्लभस्यापत्तेः किंतु संशया
पेसंसर्गविधया विरोधो भासते॥ तस्यानुपर्वमुपस्थितिर्नापि। सिते तु निर्विरोधज्ञानस्य संशयापद्ये तु त्वोत्कीर्ति च स्व
संगतमिति चेत्त तद्ज्ञानबुद्धि प्रति तद्भोत्र व्याप्यवत्ता निराणपस्त्वेन प्रतिबंधकत्वेमेव॥ तद्भावव्याप्य प्रकारता नि
रूपित न ह्रुमविछिन्न विधयत्वा पालि निरायविशिष्टत्व हमविछिन्न प्रकारतापन्न निरायित्वेन पुरुषस्य व्याप्यं
केराहि कराहिमांघ्राप मितिज्ञान ह्यपि पुरुषत्वसंदेह मिति रूजे। अपरं च तद्भावव्याप्यतित्रि ... प्रकारत्वा नि
रूपित प्रकारता शालिमिराय त्वेन पुरुष स्व व्याप्यवान यमिति ज्ञाना ह्यपि पुरुषत्व संदेह निवृत्तेः॥ एवं च संशये
कोप संशयेवि रहत्व कोटि ताव देहक यो रेकत्रैव यामिति गि॥ आभानेय गामात्त स्योपद्यौतन प्रतिबंधकाता वच्छेदकत्वापा

नोक्तानन्वेनोक्तानुपपत्तेरसाधारणेति दिक् तथा च परोक्तज्ञानं निश्चयात्मकमेवेति नीरासिद्धं नो पुनरभावादप्य
प.टी.२ द्रूपः ॥ अस्य योभयविषयकत्वात् सामग्रीकाले संशयाकारणत्वं बोधवारणाय एककोटिविषयकशब्दबुद्धिप्रतिब
३० प्रकोटिद्वयविषयकत्वाद्बोधसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवापत्तेरिति भावः ॥ वस्तुतस्तु समानाद्यसिद्धौ नो नास्ति।
त्यनर्थसंशयात्मकशाब्दबोधे महर्षेः संवादमाह ॥ समानानेकेति ॥ समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपल
ब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥ इति सूत्रे संशयहेतुत्वेन विप्रतिपत्तिवाक्यस्योक्तत्वेन कुर्व
तो महर्षेरपि संशयात्मकशाब्दज्ञाने संमतमिति समुदितग्रन्थार्थः ॥ सूत्रार्थस्तु समानानेकेषां नकोटितद्भाव
कोटिमतां योधर्मस्तदुपपत्तेः धर्मिज्ञानतज्ज्ञानानां विप्रतिपत्तेर्विरुद्धकोटिद्वयप्रतिपादकशब्दज्ञानात् योनवीति
वाक्यात् उपलब्धिरनुपलब्धिश्च मत्कोटेः तद्वाचकत्वकोटेरुपलब्धिर्यच्चितद्भावकोटेरुपलब्धिः तयोः अव्यवस्था
अवस्थापकोऽभिज्ञापकः तस्मात् संशयविषयस्यावृत्तधर्मविज्ञानादसाधारणधर्मविशिष्टधर्मिज्ञानादिति याव
त् ॥ विशिष्यते अवधार्यतेऽनेनेति विशेषः तद्विषयो यस्मात् सविशेषो विशेषाद्दर्शनं तन्मापेक्ष्य इति ॥ अनेन कारणा सम०
मुक्तालक्षणमाह ॥ विमर्श इति ॥ एकधर्मिकविरुद्धोभयप्रकारकज्ञानं विमर्श इत्यर्थः ॥ भाष्यकारस्तु ॥ समाना ३०

नेकत्वादौ समानः। कोटिद्वयसहचरितो धर्मश्च साधारणो धर्मः॥ उपलब्ध्यनुपलब्ध्यव्यवस्थातः कोटिकज्ञान
स्य तद्भावकोटिकज्ञानस्य वा सविषयकज्ञानावधारणं प्रामाण्यं संशय इति यावत्॥ विशेषापेक्षस्तु पूर्वं वि
एव। एतावता कारणमुखेन संशयविशेषलक्षणमुक्त्वा विमर्शरूपेण तेन एकधर्मिकविरुद्धनानाप्रकारकज्ञा
नत्वरूपसंशयसामान्यलक्षणमित्याह यथा नीलत्वावच्छिन्नसामग्रीघटत्वावच्छिन्नसामग्र्योस्तदुभयध
र्मावच्छिन्ने जायमानेऽर्थवशात्सम्पन्नानीलघटत्वावच्छिन्नोत्पत्तिरतो नीलत्वेन कार्यतावच्छेदकं न तथा एकधर्मिकवि
रुद्धतद्भावज्ञानसामग्र्योस्तद्धर्मिकविरुद्धनानाप्रकारकज्ञानत्वेन तद्धर्मिकविरुद्धतद्भावप्रकारकज्ञानत्वोभयधर्माव
च्छिन्ने जायमाने एवैकधर्मिकविरुद्धतद्भावोभयप्रकारकज्ञानत्वरूपसंशयत्वावच्छिन्नोत्पत्तिरपि अर्थव
शात्सम्पन्ना भविष्यतीति तथाविधसंशयस्यापि न कस्यचित्कार्यतावच्छेदकं मानाभावादित्याह॥ नानेत्यादि। स
मासे मिलनं॥ तथा च संशयत्वावच्छिन्नं प्रति धर्मिज्ञानादीनां हेतुत्वमप्युपपन्नं तासां प्रामाण्यानां मतेऽनुपादेय
मिति भावः॥ एवमिति। संशयत्वेन वृत्तिमत्यर्थः॥ संशयत्वव्याप्यज्ञानत्वरूपमिति॥ तद्धर्मिकविशेष्यतानिरूपितत
द्भावप्रकारताप्रयोजकत्वे सति तद्धर्मिकविशेष्यतानिरूपितनप्रकारताशालिज्ञानत्वरूपमित्यर्थः॥ नील अन्य

घटत्ववदिति ॥ यद्यपि नीलोत्पादकसामग्र्यभावदशायां घटोत्पादकसामग्रीबलाद्घटत्वावच्छिन्नोत्पादे नीलघटस्य
प॰टी॰र॰ ३९ घटत्वावच्छिन्नोत्पत्तिरिति तत्कार्यतावच्छेदकत्वे प्रमाणाभावाच्चान् ॥ तथापि तदभावप्रकारकज्ञानोत्पादकसामग्र्यभावदशा
यां तत्प्रकारकज्ञानत्वावच्छिन्नोत्पादमाने एवं तथाविधानियतधत्वावच्छिन्नोत्पत्तेरप्यर्थतो निर्वाहे तथाविधनियत्व
यत्वमपि न कार्यतावच्छेदकं प्रमाणाभावादिति भावः ॥ न त्वेवं सति स्वसामग्र्यनधिकरणयत्कालिकविशेषणतया घूसं
बन्धावच्छिन्नदुरितनिवृत्तिप्रतियोगितावच्छेदकतया कर्मेद्वदुरितध्वंसत्वमपि तत्त्वज्ञानकार्यतावच्छेदकं मा भूत् प्रायश्चित्त
मजन्यतत्त्वतामिदं इति चेन्न ॥ प्रायश्चित्तसमाजन्यतत्त्वधर्मस्य कार्यतानवच्छेदकत्वे प्रमाणाभाव एव बीजं ॥ प्रकृते तु न तथाविधका
र्यकारणभावगताहकत्वमेवेत्याह वेदराग्रोजनिहत्वतयानपायावरूढमवक्लृप्त्वात् । स्पर्शस्यातिरिक्तत्वपक्षे स्पर्शाप
त्ति । स्पर्शाश्रयेति ॥ स्पर्शापदार्थश्रयेत्यर्थः ॥ अतिरिक्तं इति ॥ तत्त्वाभावाभावे प्रतियोगितिरिक्तत्वस्य पक्षे । शंकते विभागेति
तथा चस्तत्त्वेन निर्वाहे स्यर्थमतिरिक्तपदार्थकल्पनमपोति भावः ॥ उद्दीपेति ॥ तथा च स्पर्शाचत्तुष्टपातनर्मविनेतत्र स
राग्रकृतारापत्तिः ॥ न चेष्टापत्तिः ॥ तथ्यासति घटप्रागभावस्यैव रूपोपि घटवान् स्पर्शाद्रतिप्रचहेणएवजेरितिभा
वः ॥ शंकते ॥ स्वजन्येत्यादि ॥ स्वपदं तत्प्रतिपरं ॥ उद्दीपकमराः स्वजन्यविभागप्रागभावविशिष्टत्वेनपूर्वक्षण राम॰ ३९

रावत्तुष्टयामवस्थापित्वान्नोपदर्शितानुपपत्तिरिति भावः॥ ननु कर्मैः न याथार्थ्यारम्भ इत्यर्थः॥ स्वत्वाननुगमादिति॥
स्वत्वस्याननुगमस्य क्विविक्षा॥ तन्तयोरित्यर्थः॥ अननुगम इति॥ स्वत्वस्याननुगम इत्यर्थः॥ अनुगतस्य स्वत्वस्य अनुपप
त्तिमुक्त्वा तथाविधक्रियैव स्वत्वमिति स्वत्वप्रकाशाजेनाप्याशिमाह॥ जातेर्विभागेत्यादि॥ जायमानेति विभाग
इत्यर्थः॥ तथा चोत्कलस्वत्वे द्वितीयस्वत्वं स्यादिति भावः॥ इदं च प्रति स्वत्वान्क्रियायाऽऽस्वत्वभानाभावदूषणमि
ति सूचितं॥ तथा च तन्नायं दोष इति ध्येयम्॥ उत्कलस्वत्वस्य प्रत्ययत्वं द्वितीयस्वत्वेः स्यु ये स्वोक्ताव्याप्तिवारयितुं उत्तर
व्याजेनाप्यकृते॥ विभागपूर्वसंयोगविशिष्टकर्मणा इति॥ स्वजन्यविभागपूर्वसंयोगोभयविशिष्टकर्मणा इ
त्यर्थः॥ तथा च लक्षणभेदेन लक्षणस्यानानात्वान्नोक्ताव्याप्तिदोष इति भावः॥ अव्याप्तिदोषस्यैवमेव कर्मणां परिहारप्र
न गमकदोषस्यानुद्धारमभिप्रेत्याह यद्यपीति॥ तदैत्यादि॥ एककालानन्तरं गम्यमाननुगम इत्यपि तिरावस्थितिः॥ स्वज
न्यविभागप्रागभावविशिष्टकर्मणाः स्वत्वमित्यर्थः॥ एवं प्रागुक्तस्यापत्तेननानात्वान्महत्त्वेन दूषणं पुरना॥
वकाव्यमिति॥ पूर्वसंयोगनाशोत्पत्तिविशिष्टक्रियायाः उत्तरसंयोगोत्पत्तिविशिष्टक्रियायाश्च स्वत्वं लक्षणत्व
मित्यर्थः॥ इदमुपलक्षणं पूर्वसंयोगनाशविभागोभयविशिष्टक्रियायाः अपि स्वत्वं तदपवेसर्पं॥ तथा चाव्या

ष्मिरूपदोषस्य परिहारेऽपि स्मरणपदार्थानुगमरूपदोषो दुरुद्धर एवेति भ्रमः। अत्रैवं स्मरणत्वमेवातिरिक्तमस्तु पदमन्ते

प.टी.र. नैवानुगतस्मरणव्यवहारनिर्वाहितत्किं स्मरणपदार्थस्यातिरिक्तत्वाभ्युपगमेनेति वाच्यम्॥ विनिगमनाविरहस्त्वेकका

३१ लीनत्वेन नानाविधतत्क्रियासु स्मरणत्वसंबंधकल्पनापेक्षयातिरिक्तस्मरणमभ्युपगम्य तत्रैव तत्संबंधकल्पनाया लघी

यस्त्वादिति॥ ननु इदानीन्तनानां इष्टापत्त्यादिपदानां कथं शाब्दबोधः॥ इदानीन्तनानां इष्टापत्त्यादिप्रकारकबोधाभावे

न विशेषणाग्रहाभावात्॥ इष्टापत्त्वविशिष्टशक्तिग्रहासंभवे न पदजन्यइष्टापत्त्यादिविशिष्टपदार्थोपस्थि

तेरभावादेवं कथं वा पुंसोऽपि पदाद् घटादिपदादिपदाच्चकद्वादिविशिष्टस्य शाब्दबोधः॥ पूर्वं इत्थमिति रीत्या पदजन्यपदा

र्थोपस्थितेरभावादित्याशंकामपनेतुमाशयाह यद्यदिष्टापत्त्युत्पादि। परिभावनीयमिति॥ परिभावनपात्रिपाद्य

मित्यर्थः॥ तथा च पंपवविद्वोद् समाधेयः किंतु भावनासाध्यसमाधानक इति भावः॥ भावनासाध्यसमाधानं चेदं

इत्थं॥ यत्र प्रमेयपदात्प्रमेयमितिमनुभवजन्यप्रमेयपदवानपानिमिसंस्कारो जातः स इदानीन्तनस्तत्प्रमेयपदात्प्रमेयबोधावश्या इ

ष्टापत्त्वमात्रप्रकारकस्मृतिजनको बोधकवदाता इष्टापत्त्वप्रकारकस्मरणं तत्र इष्टापत्त्वविशिष्टशक्तिग्रहसंभवे

न तज्जन्य इष्टापत्त्यादिविशिष्टोपस्थितेः सुलभतया इष्टापत्त्यादिप्रकारकशाब्दबोधे बाधकाभावः॥ एवंपि रम० ३१

त्याच्चादिपदस्थलेपि द्रष्टव्यम्॥ यद्वि च नन्वयोऽप्रकारकत्वेनप्रकारकस्मृतिं प्रति तं द्वयोः स्याप्रकारकाकृतस्यका
स्य संस्कारस्य हेतुत्वमावश्यकं॥ अत एव यो जातित्वरूपेण घटत्वप्रकारकसंस्कारवानपि जातित्वांशे मोषदशायां घट
इति स्मरणापत्तेः॥ तथा च कथमुपदृष्टिं तदीयस्वादृशोर्यादियदानुद्वारस्यत्वादिविशिष्टस्योपस्थितिस्तु पश्चादेवं तज्ज्ञा
ने शाब्दबोधोपपादनं चेति विभाव्यते॥ तथापि पञ्चदश्यारस्यत्वादिसंबंधेन घटादेर्भूमोज्ञानस्तत्र तथाविधवृत्ति
स्नेहाद्युपपादनं भवत्येव॥ न चैतस्य संबंधतायां प्रमाणाभाव॥ संयोगादेः संबंधतायुक्तेरत्रापि तौल्यात् इदं च
मधिकेन॥ एवं स्वत्वमपीति॥ चैत्रस्येदं धनमित्यादि प्रतीतिविषयो धनवृत्ति चैत्रनिरूपितसंबंधोपीत्यर्थः॥ पद
र्थांतरमिति॥ नैयायिकाभोस्वत्वन्त्वेनयाव द्विपुमाराध्यत्वद्वयेस्य याऽतिरिक्तमिस्यर्थः॥ ननु कुसेन निर्वाहे किं
नवाऽतिरिक्तत्वकल्पनेनेत्याशयेनाशंकते॥ यद्येवमिति तन्न स्वत्वेनातत्संभवादिति॥ भस्मरासंभवादित्यर्थः॥ तथा च
तथाविधभस्मरोकृतेपुरुषांतरयोत्ताहेपुरुषांतरस्यस्वत्वापत्तिरिति भाव॥ तन्न॥ भस्मेरराऽतथाऽविनियोगा॥
परकीयात्वादिभस्मरोस्यपास्त्वनिपिदुत्वात्तनघोगपताभादाप पुरुषांतरीयाभाऽहेपुरुषांतस्य स्वस्वत्वापत्तिरिति
भावः तथाविधराश्चाताननेतदृष्टिनस्वत्वलक्षणस्य दुःपेत्वमित्याशयेनपश्यति॥ किंतर्हित्॥ परकीयात्वादिभस्म

शानिषेधबोधकमित्यर्थः॥ तस्मा॥ उपदर्शितशास्त्रस्य प्रवृत्तिः परकीयस्वत्वाश्रयादाननिषेधबोधे सति शास्त्रबोधि
प.टी.र. ३३ ततथाविधनिषेधप्रतियोगीकृत्वरूपोपायदर्शीनि निषिद्धत्वादिदर्शितोपदर्शितिस्वत्वज्ञानमित्यन्योन्याश्रयप्रसिमध्यः॥
इदमुपलक्षणताम्॥ योग्यत्वस्यानिर्वचनात्कृत्वातपावानदृष्टेनलक्षणतामनुपपन्नमित्यपि इष्टव्यम्॥ उपसंहरति॥ तस्मा
दिति॥ क्व समध्ये निवेशासंभवादित्यर्थः॥ चचयचेष्वित्रियोगोपापृक्तोपादिविषयत्वमेवनदृस्तु॥ किंतातातिरिक्ति
त्वकल्पनेनेतिवाच्यम्॥ नाद्दृशविषयत्वापाधनस्वरूपत्वेऽपपूर्वकालेन दीपत्वव्यवहारप्रसंगात्॥ ऋपस्वरूपत्वे
सुत्रौ पनाशस्पृशातहीयस्वत्वनाशप्रसंगात्॥ अतिरिक्तं स्वत्वस्यास्माकं समीहितस्यासिद्धत्वादिति॥ ननु सव
त्रिदं संभवति स्वत्वप्रमाणसद्भावे तत्तु न पश्यामः॥ तत्राह॥ प्रमाणांचेति॥ परस्वेनाददीतेत्यादि शास्त्रस्य निषे
धप्रतियोगितावच्छेदकत्वेन स्वत्वस्य प्रमितिजनकत्वात् स्वत्वप्रमाणत्वमित्यर्थः॥ तच्चेति॥ अतिरिक्तं स्वत्वं चेत्यर्थः॥
प्रतिग्रहः॥ दानजन्यपरस्वत्वनाशानंतरोत्पन्नस्वत्वसंपादकग्रहणं॥ उपादानं॥ अस्वामिकारणस्यपाककृणा
दि पादनपरं नहेतुत्वान्यथाविधास मुद्रितैकैकसत्त्वेस्वत्वोत्पत्त्याव्यभिचारात्॥ नापि प्रत्येकं जेषांतत्रहेतुत्वं परस्परं दाय० ३३
विनापरस्परकारणात् स्वत्वोत्पत्त्यानहोषताव स्यात्॥ एवं स्वत्वनीयांप्रतिदानादीनां हेतुत्वमपि विभावनीयमुद्धं

न्यरत्नमाह॥ कारणतानामेकशक्तिमत्त्वादिति॥ स्वत्वादिरूपं प्रत्येकशक्तिमत्त्वेन तत्र तेषां हेतुत्वाभ्युपगमादित्यर्थः॥ श
ब्दनन्दीकारेत्याह॥ कार्यतानिमित्तादिनत्वादिजातीयस्वत्वरूपकार्यं प्रति प्रत्येकं प्रतिग्रहादीनां हेतुत्वाभ्युपगमादित्यर्थः॥ का
र्यकारणभावनिर्वाहः॥ स्वत्वादि प्रतिग्रहादीनां निरुक्तकार्यकारणभावः॥ केचित्तु स्वत्वं नातिरिक्तं। किन्तु तद्विशिष्टप्र
गभावविशिष्टरूपविनाशः। क्वचिद्दानादिप्रागभावविशिष्टः प्रतिग्रहादिध्वंसः। क्वचिच्च यत्प्रागभावविशिष्टपि
त्रादिध्वंसस्तत्त्वं॥ नचैवं स्वत्वमित्याकारकानुगतव्यवहारानुपपत्तिः॥ तत्रैकापत्तौ सतिविरहात्॥ अतिरिक्तस्वत्ववा
दिनापि तथाविधानुगतव्यवहारोपपत्तयेऽतिरिक्तस्वत्वस्वीकारस्यावश्यकत्वात्तावन्मात्रेणैवातिरिक्ततन्मात्रा
भ्युपगमेनानुगतव्यत्वावच्छिन्नं प्रति तत्कारणतामन्यादीनां नानात्वादिनाहेतुत्वं गौरवमात्॥ किंतु तत्संबंधे ध्वंसका
मतिरिक्तं शक्तिस्वीकारेणैकशक्तिमत्त्वेनैव तत्र तेषां मेवधानां हेतुत्वमिति मीमांसकमतमवलंब्याह॥ स्वत्वमिति॥
अतिरिक्तं पति॥ वस्तुतः तत्ताद्वच्छेदकत्वेन तत्तदादिसंबंधेनातिरिक्तशक्तिरभ्युपेयत इत्यर्थः॥ ननु तत्तदादिजन्यताव
च्छेदकत्वेन वह्निमिष्टजातिद्वयं स्वीकृत्य तत्तथाविधजातिद्वयावच्छिन्नं प्रति तत्तदादीनां कारणत्वादिनाहेतुतात्रयकल्प
नेनैवोपपत्तौ किमतिरिक्तशक्तिकल्पनेनेत्यत आशंक्य निरस्यति तु माह॥ तत्तदादिस्पष्टत्वमित्यादि। तथा च तादृशजाति

प॰टी॰र॰
३५

यमभ्युपेत्यकार्यकारणाभावस्यानभ्युपगमे गोत्वाजहयेन्हैकोमतिरिक्तांदाक्तिमभ्युपेत्यैकशक्तिमत्वेनतत्रैककार्य
कारणभावकल्पने लाघवस्यातिस्फुटत्वात् इति भावः ॥ ननु नाडयोः संबंधत्रयेष्वेकां जातिमभ्युपेत्य न तत्र तद्विध
जातिमत्वेनैकहेतुताकल्पनोपपत्तौ लाघवाभावात् इतिरिक्तशक्तिकल्पनमनर्थकमित्यत आह संबंधत्रितयमा
दि । जातिसंकरप्रसंगादिति नोदनत्वाभाववतिनाड्या जातिरभिघातत्वनाड्याः संयोगेनाड्या जात्याभाववतिरभ्यादि
नोदनात्मसंयोगेनोदनत्वजातिः एकत्र नाड्या नोदनात्मसंयोगे नाड्या जातिद्वयसमावेशात् सांकर्यमिति ते
षु जात्यंगीकारेः पापा इति भावः यद्विवेति ॥ वस्तुतस्तथाविधान्वयव्यतिरेकानुविधाने मानाभाव इति भावः ॥ ते
षामपीति । तत्राद्दीनामपीत्यर्थः ॥ मणित्वादिनेति ॥ आदिनातेजस्त्वादिपरिग्रहः ॥ संकरस्तु स्पष्ट एव यानापया
दिनइति ॥ अत्रेदमवधेयम् ॥ तृणादिसंबधानामेकशक्तिमत्वेन तत्र हेतुत्वे फूत्कारादभावदशायांवह्नित्वावच्छि
न्नापत्तिः । न च फूत्कारादीनामपि सहकारित्वकल्पनान्नानुपपत्तिरिति वाच्यम् ॥ तथापि अरणिसंबंधसत्वे मथनाद्यस
त्वेवह्नित्वावच्छिन्नोत्पत्त्यापत्तेः तस्मात्तृणादिजातित्रयमभ्युपेत्य प्रत्येकं नाड्याजातित्रयावच्छिन्नं प्रतिप्रत्येकं तृणादीनां राम॰
स्वगतत्वादिना हेतुतात्रयकल्पनेन तु नैषानुपपत्तिः ॥ तृणत्वावच्छिन्नेन फलेजनने एव फूत्कारस्य सहकारित्वाभ्युपगमात् ३५

त्॥ न च धूमकारणादिसंबंधानां मध्ये कदाचित्मत्वे नैव तन्न हेतुत्वं स्मरणीयसंबंधकालीनधूमकारणादिसंबंधेनाहुत्याद्या
भ्यनभ्युपगमेन न तदवच्छिन्नस्य सत्तकारित्वाभ्युपगमे ऽपूर्वदितिलापत्तिरिति वाच्यम्॥ न यावत्सत्वितकारणादिसंबं
धानां एकयाकिंचिन्मत्वेन हेतुत्वे मानाभावः॥ धूमकारणादिसंबंधाभावकालीनधूमकारणादिसंबंधेनाहुत्याद्यनभ्युप
गमात् नैवापत्तिवारस्यासंभवात्॥ पहि चेतिनिगमनाविरहेणालाहद्याभावरूपहेतोरहेतुत्वमवश्यमभ्युपेयमि-
ति भावः॥ न हि तृणादिसंबंधकालीनवायुसंयोगादिनामपि एकयाकिंचिन्मत्वेन हेतुतामात्रापविनिगमना
विरहो तुल्यरिति तिनस्यान्यादित्रयमभ्युपेयते यावद्विधकार्यकारणभावकल्पने मेवं नियतं बाधकस्य लिमाद्यानी
ति सारम्॥ ननु कारणत्वं नान्यथासिद्धत्वे सति कार्यनियतपूर्वकालवर्तित्वं एतद्घटत्वावच्छिन्नं प्रति हेयात्तरी
यकसमाहेरपि हेतुतापत्तिः॥ नापि कार्यावच्छिन्नपूर्ववृत्तितावच्छेदकरूपाविकरणत्वं जितदिविकाहस्याभावस्याप्र
तियोगितानवच्छेदककामतेग्रोधमस्तिद्रुत्वं कारणत्वं विषयतासंबंधेन धूमादिकं प्रति विषयतासंबंधेन हान्नस्या
हेतुत्वानुपपत्तेः॥ अवच्छेद्याधिकरणो संबंधस्य कारणास्यावच्छेदकान्याभावेन तद्दृष्टाव्यवहितपूर्ववृत्तितावच्छिन्नस्य
विषयतासंबंधेनाधिकरणीभूतो यो नागनयाकलेदृत्वित्वस्याभावे प्रामिश्यात पायिधकारणात्वस्यात

ी.र.
५

त्रासंभवात् ॥ अथ कार्याव्यवहितपूर्वक्षणावच्छिन्नकार्यसमानाधिकरणवृत्तित्वविशिष्टस्याभावस्य सामा
नाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकात्यन्तच्छेदकीभूतो योऽन्यथासिद्धनिरूपकधर्मस्तत्त्वं कारणत्वं ॥ अन्य
थासिद्धानिरूपकत्वं च पंचमाच्छिन्नज्ञापकतावच्छेदकीभूतयद्धर्मावच्छिन्नत्वं आकाशादीनां न कारणत्वव्यवहारस्तद्ध
र्मभेदकूटवत्त्वं ननु अन्यथासिद्धिपंचकानिरूपकत्वं तथा सूत्रसंयोगस्य प्रतिविभागस्य हेतुत्वापत्तेः ।
अन्यथासिद्धिपंचकं तु यथा ॥ अन्यं प्रति पूर्ववर्त्तित्वं विज्ञातमेव यस्य यं प्रति पूर्ववर्त्तित्वं गृह्यते तस्य तेनान्यथासि
द्धत्वं ॥ यथा ज्ञाने प्रतिशब्दसमवायिकारणत्वेनाकाशोऽन्यथासिद्धः ॥ एवं कारणान्तरेण सह यस्य पूर्व
त्ति पूर्ववर्त्तिता गृह्यते तस्य तं प्रत्यन्यथासिद्धत्वं । यथा घं प्रति दंडत्वविशिष्टदंडेनान्यथासिद्धम् एवमन्यत्रापि स
नियतपूर्ववर्त्तिन एव कार्यसंभवे तत्कार्यं प्रति तत्कारणसहभूतमन्यथासिद्धं ॥ यथा पाकजरूपं प्रति गंधप्रा
गभावोऽन्यथासिद्धः ॥ एवमन्यमुद्दिश्यापि धर्मेण यस्य यं प्रति कारणत्वं संभवति तस्य तं प्रति गुरुज्ञापकधर्मे
णान्यथासिद्धत्वं । यथा घटं प्रति कपालत्वेन दंडोऽन्यथासिद्धः ॥ यावद्धर्मावच्छिन्नजनकतावच्छेदको यो धर्मः राम०
सोऽपि तत्रान्यथासिद्धः ॥ यथा घटत्वावच्छिन्नं प्रति दंडत्वेनान्यथासिद्धमिति । विभागत्वावच्छिन्नेन निरूपितान्यथासि ३५

द्धिं पंचकमध्येकस्याप्यसत्वात् एवं प्रतिबंधकाभावस्यतत्तद्व्यक्तित्वेन हेतुत्वापत्तेश्च ॥ तत्तद्व्यक्तित्वविशिष्टस्य प्रसि
द्ध्यन्यथासिद्धिपंचकाभावात् ॥ अत एव कालो अन्यथासिद्धपंचमभिन्नत्वं विशेषणांशस्याऽनिरुक्तधर्मेति र
पकत्वविशेषणदानं ॥ अन्यथा प्रतिबंधकाभावस्यापि प्रतिबंधकीभूतधर्मावच्छिन्नाभाववत्त्वेन हेतुत्वस्य सर्व
सम्मतस्याभावापत्तेरिति चेन्न । अभाववत्त्वज्ञानस्याशक्यतयाऽ इह प्राकाररात्वस्यासर्वत्रापरिच्छेद्यत्वापत्तेः ॥
न च स्वाव्यवहितपूर्वक्षणावच्छिन्नस्वाधिकरणवृत्तित्वविशिष्टाभावप्रतियोगितानवच्छेदकत्वविशिष्टतत्तद्व्य
क्तिभेदकूटवत्त्वसंबंधेन कार्यविशिष्टोपधर्मसिद्धत्वं तत्र च नोभयं ॥ संबंधस्याज्ञानस्यैव विशिष्टबुद्धिविषयत्वा
दिति वाच्यम् ॥ तस्य संबंधत्वसंदेहेन तथात्वेनानुमत्यवोत्वात् इत्यत आह ॥ कारणत्वं चेति ॥ पदार्थान्तरमिति ॥ तथावि
धनिपतनपूर्ववर्तित्वादिघटितरूपमित्यर्थः तस्य सर्वत्रैकत्वे दुर्ग्रहत्वात् रूपकारणतानघटनीरूपितां इत्यावच्छिन्नका
रणतानवच्छेदकत्वावच्छिन्नस्याघाकारस्य प्रतीत्यनुपपत्तेः अत आह ॥ तद्वेति ॥ कारणत्वं चेत्यर्थः ॥ अवच्छेदकभेदादि
ति ॥ कारणतावच्छेदकभेदादित्यर्थः ॥ अन्वेवं सति कारणं कारणमित्याकारकानुगतप्रतीत्यनुपपत्तिरेवेत्यत अनुगत
कारणपदशक्यतावच्छेदकानुपपत्तिरित्यत आह कारणत्वेनेति ॥ तत् ॥ कारणत्व ॥ तथा च कारणत्वत्वरूपानुग

प॰टी॰र॰ ३६

तद्धर्म्मिकाद्यायत्तव्यक्तिविषयानुगतप्रतीत्यनुपपत्तिरिति भावः ॥ अत्रेदं तत्त्वं ॥ कारणत्वं नातिरिक्तं किंतु कारणता
वच्छेदकस्वरूपं ॥ न चैवं सत्यभेदेऽवच्छेद्यावच्छेदकभावानुपपत्तिरिति वाच्यम् ॥ एकरूपेणानद्रूपेणाभ्युपगमात् अ
न्नकारणात्मत्वेनावच्छेद्यायाः कारणतायाः अवच्छेदकत्वे स्वस्वरूपतो द्रव्यत्वेऽभ्युपगमस्यातिविरहात् अतिरिक्तका
रणत्वस्य सर्वैरंगीकारादिति ॥ तस्येति ॥ कारणत्वस्येत्यर्थः ॥ आगमाहिकमिति ॥ वैद्याहिकमित्यर्थः ॥ एतेनेति ॥
क्रमात्मभाविनि वीहीत्यर्थः ॥ व्याख्यातं अतिरिक्तत्वेन व्याख्यातं ॥ एकत्वे ॥ कारणत्वस्यापि किं न एवं वदति ॰ न स्मादि
तिविनिगमनाविरहादित्यर्थः ॥ भिन्नमिति ॰ परस्परभिन्नमित्यर्थः ॥ नद्वित्वप्रत्ययात् एकरूपं द्विरूपे इत्याकारकसंख्या
वत्वप्रत्ययात् तथा च संख्यायां गुणत्वे इत्यादि गुणेन तथाप्रत्ययानुपपत्तेः ॥ गुणे गुणानंगीकारादिति भावः ॥ असा
चिति ॥ रूपादौ संख्यावत्त्वप्रत्ययपर इत्यर्थः ॥ बाधकाभावादिति ॥ न चात्र बाधकाभावेपि भ्रमत्वांगीकारसंभावनीतिबला
त्यक्तार्थमात्रविलोपप्रसंगः ॥ सर्वत्रैवमपि तत्तथा वक्तुं शक्यत्वादिति भावः ॥ एकार्थेति ॥ स्वाश्रयसमवेतत्वप्र
त्यासत्येत्यर्थः अविलक्षणायास्तद्वत्वप्रतीतेरिष्यमाणत्वात् अविलक्षणसंबंधविषयकत्वो नानुभवसिद्धायाः संख्या
वत्वप्रतीतेः संभवादित्यर्थः ॥ ननु तथाविधानुभवे मानाभाव इत्यत आह ॥ घटत्वादौ चेति ॥ द्वित्वादीति ॥ घटत्वद्वय

राम॰ ३६

मित्यादिप्रत्ययप्रसंगादित्यर्थः॥ तथाचैकार्थसमवायेन विशिष्टबुद्धिनियामकत्वमिति भावः॥ ननु तत्संभवइति
न स्वाश्रयसमवेतत्वसंबंधेन संख्यादिप्रत्ययसंभवइत्यर्थः॥ रूपत्वादेरेकत्वादिसंख्याया आश्रयाभावेन तथास
मवादिति भावः॥ समवायस्यैकत्वे बाधकमाह॥ जलादावित्यादि पृथिव्यां गंधसमवायस्य जलनिष्ठत्वे हि सम
वायस्याभिन्नतया जलादावपि गंधसमवायसत्त्वात् तत्र गंधवत्ताप्रतीतिर्दुर्वारैवेति भावः॥ ननु च जले गंधनि
रूपि। न च विशिष्टसमवायाभावान्न गंधवत्ताप्रतीतिरिति वाच्यम्। विशिष्टस्यातिरिक्तत्वाभावेन जलेपि तत्स
त्त्वात् तथाविधविशिष्टनिरूपिताधिकरणतायाश्चातिरिक्तत्वात् किमपराद्धं विभिन्नसमवायेनेति। वैशिष्ट्यमपी
ती॥ विशेषणतानाविशेषोपीत्यर्थः॥ निमित्ततावि(ष)यतातस्यापि अतिरिक्तविशेषणतानाविशेषस्यापी॥
ननु नाहृद्याप्रतीतेः स्वरूपसंबंध एव विषय इत्याशंकते। स्वरूपसंबंधेत्यादि तत्तदधिकरणादिस्वरूपसंबंध
इत्यर्थः तथाप्रतीतिनिमित्तिः अभाववत्ताप्रतीतिविषय इत्यर्थः॥ तत्रापि एवं प्रतीतावपि स्वरूपसंबंधविशे
षस्य तत्तदधिकरणस्वरूपसंबंधविशेषस्य। निमित्ततायाः विषयतायाः तथाच समवायमतेपि रूपवान्घ
ट इत्यादिरूपस्वरूपसंबंधस्य संयोगादिसंबंधत्वाभ्युपगमस्तथा घटपटौ मिथः संयुक्तौ इत्यादिप्रतीते स्तत्त्वधि

प.टी.र.
३८

कररणसांसर्गिकविषयताभ्युपगमेगौरवं॥ पद्वसं योगस्यस्वरूपसंबंधसंयोगएवतन्हासंयोगेनसंयोगी
वर्त्तनउभ्यपिप्रत्यपंस्यात् इति अतिरिक्तसमवायआवश्यकः॥ नचातिरिक्तसमवायस्वीकारेतुल्ययुक्त्यातद्वै
शिष्ट्यस्याप्यतिरिक्तस्यस्वीकाराद्धुभयकल्पनेगौरवात्तन्तदूपेस्यातिरिक्तवैशिष्ट्यस्यस्वरूपसंबंधएवसंयो
गादिसंबंधत्वाभ्युपगमउचितइतिवाच्यम्॥ उपदर्शितयुक्त्याविनिगमनाविरहेणासमवायसिद्धौपश्चात्
वैशिष्ट्यस्यसंबंधविशेषकल्पनस्यफलमुखत्वेनादोषत्वात्॥ वैशिष्ट्यस्यसंबंधत्वेवैशिष्ट्यस्यस्वरू
परावेत्तिनानवस्थेतियदिविभाव्यतेतदातुल्ययुक्त्याभावस्यातिरिक्तवैशिष्ट्यसंबंधस्वीकारोप्यावश्यकः॥ अ
भावस्याभावसंबंधत्वाभ्युपगमेऽभावाधिकरणात्मकस्वरूपभेदेनावश्यमात्रविषयकज्ञानादिकमादायविनिगम
नाविरहापत्तेः॥ नचाभावस्यातिरिक्तसंबंधस्वीकारेपिताद्दशविनिगमनाविरहोदुर्वारः इतिवाच्यमुक्तसेनतत्त्व
स्यविनिगमनाविरहासंभवादितिभावः॥ एतेनक्लृप्तातिरिक्ताभावासंभवेनव्याख्याता॥ अतिरिक्तत्वेनव्याख्याता
अपभावः॥ विषयतायाज्ञानस्वरूपत्वेघटपटाविवितिसमूहालंबनस्यभ्रमत्वापत्तिः॥ तत्रतदुभयविषयता
याःएकज्ञानस्वरूपत्वेनघटत्वावच्छिन्नघटत्वाद्यभाववद्वृत्तिविषयताप्रतियोगित्वरूपभ्रमत्वाविषयतायावि

रम०
३८

पदा॰ र॰ यथस्वस्यान्वेतुघटम्तत्वसंयोगाइतिसमहाल्वंवनत्वाघटत्वतूतत्वमितितिविशेषवुद्धेवैलक्षण्यापत्तेः॥ नच
३८ समहाल्वंवनेऽधिकसंयोगात्वस्यभानत्वात्ततथेतिवाच्यम्॥ तथापिघटत्वतूतत्वंसंयोगागाम्रेतितानाजातेषु
समहाल्वंवनस्यवैलक्षण्यानिर्वाहात्॥ नचविशिष्टवुद्धौसंबंधसंबंधोप्यपेक्षितोभासतइतिनानुपपत्तिरिति
वाच्यम्॥ संबंधसंबंधमादायापिसमहाल्वंवनसंभवात्इत्यादिकंविषयतादिविचारेऽनुसंधेयमितिसंक्षेपः॥
अर्थानामित्यादिनानुक्तप्रयोजककारत्वलेऽदयाहिस्पतत्याह॥ युक्तिसिद्धानामिति॥ मदुक्तानांनापोक्तानां॥ द
र्शनंशास्त्रंभवाद्दशानपंडितानएवापूर्वत्वेनोक्तापूर्वपंडितैः वाच्यत्वानिमिथ्याहितिः पराजितेः॰ पंडिता
नित्यर्थः॥ ॥पदार्थखंडनाद्भुतपुस्तनपुरोहितं। शिरोमणिमहंवंदे शिरोमणिमिवार्जुनं १ श्रीमद्वोधिनि
कारकल्पितघटाकोलाहलव्याकुलेमार्गेसिघरयापयन्निगहितासिद्धांतसिद्धेतरत् देवाज्ञेनमवेद्घृतीहसह
सात्प्रोद्दापराधोमेमत्तःनंत्यःहृतिभिः प्रतोयदिभवेघश्लानुरूपोवलिः॥ ॥इतिरघुदेवमहाचार्यविरचिता
पदार्थखंडनव्याख्यासमाप्ता॥ ॥शुभमस्तु॥ ॥श्रीदुर्गायैनमः॥ ॥संवत् १८ २८ मीतीपुसवदुव रा॰
दी १४॥ ॥रामराम॥ ॥श्रीराम॥ श्रीकृष्ण॥ ॥ ॥ ॥ ॥ ॥ ॥ ३८